7.12-12 संप्रदाय प्रदीप

31

7.12-12

21.2×11.5

CENTRAL LIBRARY, BARODA.

SANSKRIT SECTION.

Acc. No. 4257 Subject [illegible]

Name संप्रदायप्रदीप

Author गदाधर (द्विवेदी) 750.

1610 सं Age 1761 सं Extent 63 L 7.00

Language S Script N

4-0-0

CENTRAL LIBRARY
SANSKRIT DIVISION
BARODA

CENTRAL LIBRARY
SANSKRIT DIVISION
BARODA

संस्कृत पुस्तकालय बडोदें

प्र.सं.नं. ३६५५

व. मर्क

ग्रं.सं. १६

॥संप्रदायप्रदीप॥

32

वि.नं. १२

पत्र ५३

लि.ऊ.नं. १७३०

वे. ७८
१२

१.०.

4257

॥ श्रीकृष्णगोपीजनवल्लभाय नमः ॥ योनुग्रहार्थं प्रकृतिगो
पिकानां गिरींद्रधृत् जिनि रासमध्ये ॥ वल्लववल्लूयः सकललोकले
शः स्वाम्यं तु विष्ण्वादिपदैकनामा ॥१॥ सएव कृष्णो जनिवल्लभा
रव्यः । स्वकीयमाहात्म्यमवादि येन । न वाग्निरूपं तमहं करो
मि तत्त्वं प्रदाय क्रममनुक्तपूर्वं ॥२॥ श्रीवल्लभस्यात्मजविठ्ठले
शे प्रशासति प्राणहिते कृते तौ । मार्गं तिदीयं किल तस्य शिष्योग
दाभिधो वक्ति यथामतीदं ॥३॥ तत्रादौ पलादिकालमानः । ब
र्हापीडं मौलौ बिभ्रद्वंशीनादेनानातन्वन्नानाकल्पः श्रीसंपूर्णे

गोपस्त्रीभिः संवीतः। नेत्रानंदं करं वा। ब्रह्मणं वेदस्मान् वीक्षेथाः स
र्वैकामां संपद्येरन्नस्मात् कं हृद्यासीनाः। गुर्वक्षरषष्ठ्या एकं पलमुच्यते।
पलषष्ट्यैका घटी भवति घटीषष्ठ्याहोरात्रं मनुष्याणां। त्रिंशद्भिरहोरा
त्रैर्मासः मासैर्द्वादशभिर्वर्षं वर्षाणां सप्तदशलक्षैरष्टाविंशतिसह
स्राधिकैः कृतं भवति। द्वादशलक्षैः षण्णवतिसहस्राधिकैस्त्रेता। अ
ष्टलक्षैः चतुःषष्टिसहस्राधिकैर्द्वापरं। चतुर्लक्षैर्द्वात्रिंशत्सहस्राधि
कैः कलिर्भवति। एवं चतुर्युगं। एकसप्ततिचतुर्युगैर्मन्वंतरमाहुः। च
तुर्दशमन्वंतरैर्ब्रह्मणो दिनं तावत्येव रात्रिः। एतादृगहोरात्रैस्त्रिंश

ड्विब्रह्मणो मासः। मासैर्द्वादशभिर्वर्षं। एवंविधवर्षशतं परमायुर्ब्रह्म
णः। यथोक्तं ज्योतिःशास्त्रे। शतायुः शतानंद एवं प्रदिष्टस्तदायुर्म
हाकल्प इत्युक्तमाद्यैः। अतो नादिमानेष कालस्ततोऽहं न वेद्म्यत्रप
द्मोद्भवाद्येगतास्तान्। ब्रह्मणो वर्षशतेन मनुष्याणां द्विपरार्द्धवर्षा
णि भवंति। परार्द्धसंख्यागणकशास्त्रे। एकं दश शतमस्मात्सहस्र
मयुतं ततः परं लक्षं प्रयुतं कोटिमथार्बुदमब्जं खर्वं निखर्वं तस्मात्
महासरोजं शंकुं सरितांपतिं ततस्त्वंत्यं मध्यं परार्द्धमाहुर्यथोत्त
रं दशगुणोत्तरज्ञाः। चतुर्विधप्रलयः। यथोक्तं द्वादशस्कंधे श्रीभागवते। २

नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः। आत्यंतिकश्च कथितः
कालस्य गतिरीदृशी॥१ नित्यप्रलयलक्षणं नित्यदा सर्वभूतानां
ब्रह्मादीनां परंतप। उत्पत्तिप्रलयवेकेस्तत्स्नं ज्ञानं प्रवक्ष्यते। निमित्त
लक्षणं। चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते। सकल्पो यत्र मनव
श्चतुर्दश विशांपते॥१ तदंते प्रलयस्तावान् ब्राह्मी रात्रिरुदाहृता
। त्रयो लोका इमे यत्र कल्पंते प्रलयाय हि॥ एष नैमित्तिकः प्रोक्तः
प्रलयो यत्र विश्वसृक्। शेते नंतासनो विश्वमात्मसात्कृत्य चात्म
भूः॥३॥ अथ प्राकृतिकः। द्विपरार्द्धे व्यतिक्रांते ब्रह्मणः परमेष्ठिनः

तदा प्रकृतयः सप्त कल्प्यंते प्रलयाय वै ।।१।। एष प्राकृतिको राजन् प्र
लयो यत्र लीयते । आंडकोशास्तु संघातो विघात उपसादिते ।।५।।
अथात्यंतिकलक्षणं ।। यदेव । यदैवमेतेन विवेकहेतिना मायामयाहं
करणात्मबंधनं । छित्वाच्युतात्मानुभवोवतिष्ठते तमाहुरात्यंतिक
मंगसंप्लवं ।। ब्रह्मणस्त्वेकवर्षमध्ये त्रीणि शतानि षष्ट्यधिकानि भवं
ति प्रलयाः । नैमित्तिक दैवं दिनमानं प्रतिरात्रं । सप्तमपातालादारभ्य ता
महर्लोकं यावत् ब्रह्मणः प्रतिदिनं पुनः पुनः सुरासुरनरादीनां स
ष्टिर्निवृत्तिः । यथोक्तं । तथा । वर्तमानस्य कस्यायुषोर्द्धं गतं सार्द्धवर्ष . ३

ष्टकंकेचिद्रुवुः। ब्रह्मणःस्वकीयमानेनअपर्यं वाशब्दषणिअ
र्द्धवर्षवायुरतिक्रांते। अर्द्धवर्षपर्यांतिमदिवसस्यश्वेतवाराहकल्प
इतिसंज्ञा। ब्रह्मणःप्रथमवर्षजन्मदिनादारभ्यब्राह्मपाद्मादयो
बहवःकल्पाव्यतीताः। ततःकेनसंख्याकर्तुंशक्यते। केचित्कल्पाः
सात्त्विकाः। केचिद्राजसाः। केचित्तामसाः। सात्त्विकेषुविष्णोःप्र
वृत्तिर्भवति। राजसेषुब्रह्मणःसृष्टिः। रुद्रात्तामसेषुकदाचिद्गणा
वत्याः। स्कंदपुराणेश्वेवमनेकं दृश्यते। नन्वासोविरोधः। तदसौश्वे
तवाराहकल्पोख्यब्रह्मणोदिवसेषण्मन्वंतराण्यपैतानि। स्वायंभुवः। १

धा ती

स्वारोचिषः२ उत्तमः ३ तामसः४ रैवतः५ चाक्षुषः६ अतीताः।
षडेते मनवः। वैवस्वतो वर्त्तमानः सप्तमः। अथ भविष्याः। सावर्णिः८
दक्षसावर्णिः९ ब्रह्मसावर्णिः१० धर्मसावर्णिः११ रुद्रसावर्णिः१२
देवसावर्णिः१३ इंद्रसावर्णिश्चतुर्दशः। १४ तपः सत्यं दया दानमिति
चतुष्पाद्धर्मः कृतयुगे बभूव। त्रेतायां त्रिपात्। द्वापरे द्विपात्। कलौ
वे एकपात्। ब्राह्मणक्षत्रियवैश्यशूद्राः इति वर्णाः। ब्रह्मचारिगृहस्थ
वानप्रस्थयतयः इति आश्रमाः। एषां नित्यनैमित्तिककाम्यादि
भेदेन धर्मो वेदे नोक्तः। मनुयुगमन्वंतरजगदवतारो भवतिप्र ९

तिमन्वंतरं पृथगिंद्राः सप्तरुषयश्च। इंद्रानुयायिनो देवाश्च।
मनुपुत्राश्च राजानः। वेदादिशास्त्रप्रवर्त्तकाः रुषयः। त्रिलोकी
शास्तारश्चेंद्राः। अधर्मविघातको भगवदवतारः। दंड नीत्या धर्मपा
लका राजानः। अनुमन्वंतरं प्रतिद्वापरं एकस्य प्रति वेदव्यासा भ
वंति। अस्मिन् श्वेत वाराह कल्पे वैवस्वत मन्वंतरे अष्टाविंशतितमे
द्वापरे पराशरात्मजः सत्यवतीनंदनः कृष्णद्वैपायनो बभूव। ये
न वेदा व्यस्ताः कृतं च वेदांत शास्त्रं। महाभारतं च। श्रीभागवतं च
तस्मात् वेदव्यास मतमाश्रित्य द्वापरतः इदानींतना अपि धर्मा

र्थकाममोक्षहरिभक्तिरितिपुरुषार्थपंचकंप्रवर्त्तयंति। त्रेता
द्वापरांतंधर्मार्थकाममोक्षाणांप्रवृत्तिः। कलौहरिभक्तिरेवपु
रुषार्थः धर्मश्चैकपात् कृतेत्रेतायांच अन्येषामृषीणांमतमाश्रि
त्यधर्मादय आसन् च अन्येषामवताराणांमछनृसिंहरामादीनां
भक्तिः। कलौतु कृष्णस्यभक्तिरेव। वेदव्यासस्याभीष्टदेवतत्वात
कलौदेवोमहेश्वरः कलौचंडिविनायकौ। कलौरामेतिकीर्त
नं इतिपुराणादिषुयद्दृश्यते तत्सत्यंपरंतन्नायंकलिः अन्येते
कलयःकृताःसविषाःश्वेतवाराहकल्पेवैवस्वतमन्वंतरेष्टाविंश ५

तिमकलिविषयं त्वज्ञां उपुराणोक्तं द्रष्टव्यं। कलौ दशसहस्रेण
विष्णुस्त्यजति मेदिनीं। तदर्द्धं जाह्नवी गंगा तदर्द्धं सर्वदेवताः।। तत्
तादृक्षापरां तेये वेदोक्तवर्णाश्रमेतरधर्मपरा बभूवुः। तेषां धर्मस्त्रि
धा फलेच्छवः। ये स्वधर्मदेशाचारत्स्वर्गाद्यभिलाषिणः। कलेरादि
गी तमसमाप्तिपर्यंतं स्वर्गसुखं भोक्ष्यंति। ये मुमुक्षवस्ते निष्कामस्वध
र्मतो वैराग्यपूर्वकज्ञान योगेन सांख्य वेदांतयोगशास्त्रवैष्णवशै
वोक्तमार्गेण नाना विधं मोक्षं प्राप्ताः। ये वै तत्काले गुणज्ञाः कलेरा
द्यसहस्रवर्षमध्ये वतारमिच्छंति। यथोक्तं श्रीभागवते एकादशस्कं

ये। कलिंसभाजयंत्यार्यागुणज्ञाः सारभागिनः। यत्र संकीर्त्तनेनै
व सर्वस्वार्थोभिलभ्यते। कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः। द्वा
परे परिचर्यायां कलौ तद्धरिकीर्त्तनात्। कले दोषनिधे राजन्नस्ति ह्येको
महानगुणः। कीर्त्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत्। ३। तत्रैव कृता
दिषु प्रजाराजन कलाविछंतिसंभवं। कलौ खलु भविष्यंति नारा
यणपरायणाः। क्वचित्क्वचिन्महाराज द्राविडेषु च भूरिशः। ताम्रपर्णी
नदी यत्र कृतमाला पयस्विनी। कावेरी च महापुण्या प्रतीचीच महान
दी। ये पिबंति जलं तासां मनुजा मनुजेश्वरा। प्रायो भक्ता भगवति वा ६

स्तुदेवेमत्ताशयाः।वेदोक्तयज्ञभागनुजोदेवः।ब्रह्मरुद्रशक्ति
गणपतिवस्वादित्यसाध्यविश्वेदेवादयोब्रह्मांडपुराणोक्तकालंयाव
धी त्तिष्ठति।कलौगंगावउक्तदेशेनागीरतीरेपुरुषोत्तमक्षेत्रेश्री
जगन्नाथरूपेणविष्णुस्तावत्कालंकलौवैष्णवानवतरंति।श्रीलक्ष्मी
दन्येदेवतानक्तस्यततःकलौसिद्धिर्नभवति।स्वल्पमंदिरप्राघूणि
वतू।धर्मस्यसिद्धिस्तादृशीनभवति।धर्मस्यैकपादत्वात्।तस्मादेषो
क्ते श्रीवा[illegible]क्येन।सर्वमार्गेषुनष्टेषुजनेचरबलधर्मिति।पाषंडप्रचु
रेलोकेलक्षणवगतिर्मनिः।जनेकपालकाम्नेछलौकिकादयोबहवः।

धर्म

पाषंडा वेदमार्गाद्बहिः कलौ भवंति निरयदाः। यथोक्तं विष्णुपुराणे धर्मेतरे। कृतादिद्वापरांते च जन्म जाजो हि जंतवः भवंति जन्म जाजस्ते यावत्कालं कलिव्रजेतुः। भवंति ये कलौ जीवास्तेवै निरयगामिनः। कृतादिद्वापरांते वै कालेनास्त्यत्र संशयः। कलेरादौ दश सहस्र वर्षमध्ये वर्त्तिनः त्रिधा जंतवो भवंति। कर्मणा मनसा वाचा श्रीकृष्णं हि भजंति ये। संप्रदायि गुरोर्वाक्यात्तु ते विष्णोर्न कलेर्नराः॥ इति स्कंदपुराणात्तु। वेदोक्तधर्महीनत्वात्सर्वे निरयगामिनः। भजनात्तु हरिं जीवाः कलौ पाषंड संकुले। केचिद्विष्णोः पदं यांति धर्मस्यैकपदाश्रयेण स्वर्गं विष्णुनां मध्ये

कोपियास्मृतौ अन्येसर्वेपिनिरयगामिनः। इतित्रैविध्यमुक्तं

यथोक्तंब्रह्मवैवर्त्तीयवाक्यारकलिर्द्वियःकालरूपेणकेवलं। सपुच्छ

स्तुयवोज्ञेयः। पुच्छेशूद्रइतिस्मृतं। आद्यंदशसहस्रंतुयवरूपं

प्रकीर्त्तितं। तदूर्द्धपुच्छसंज्ञंस्यात्कलिकालंतुनीरसं। तुषाधिका

न्यसर्वर्षदायाहावंतेयवोनवेतुसबाधिकोमध्यभागेपुच्छेसारांश

वर्जितं। एवमादिकलिदृष्टोधर्मराजोदिवंययतः। गतःसकृष्णोधर्म

स्यरक्षानिरासीत्क्रमात्ततः। पंचवर्षसहस्रांतेएवमध्यंप्रकीर्त्तितं। स

धर्मोजगवद्भक्तिस्ततःकालेनवर्द्धते। ततोवर्षायुतस्यांते। यवस्यां

तावदंतिहि। तत्र नक्तिस्वधर्मश्चक्रमादंते व्रजिष्यति॥६॥ पुष्करा
दीनितीर्थानि गंगाद्याः सरितस्तथा। सप्तपुर्यश्च शैलेंद्रा अगम्या मा
नुषैस्ततः॥७॥ भविष्यंति कलौ घोरे ह्याद्य वर्षायुतात्परं॥ रक्षांसि तेषु
स्थास्यंति दुष्टश्वापदरूपतः॥८॥ एवं श्रीमन्नृपयुधिष्ठिरराज्यसमया
त् दशसहस्रवर्षपर्यंतं कलौ भागवता भवंतीति सिद्धं। ननु वर्णा
श्रमोक्तनित्यनैमित्तिकविधानस्तन्ये कलौ भगवन्नामं तदकरणे
प्रत्यवायो न स्याद् वा भविष्यंति। न स्यादिति श्रीभागवते एकादशस्कं
धे। कलिविषये वाक्यानि। देवर्षिभूतात्मनृणां न किंकरो नायमृणीव

राजन्। सर्वात्मनायः शरणं शरण्यं गतो मुकुंदं परिहृत्य कृत्यं।१।
तत्रैव तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथा श्रवणा
दौ वा श्रद्धा यावन्न जायते।पुनश्च। ज्ञाननिष्ठो विरक्तो वा मद्भक्तो
वानपेक्षकः। सलिंगानाश्रमान् त्यक्त्वा चरेदविधिगोचरः।३। बुद्धि
पूर्वं निषिद्धाचरणं नैवाचरंति भागवताः। परंतु ईश्वरेच्छया नि
षिद्धाचरणे ईश्वरशरणंगतानां ईश्वर एव प्रत्यवायं निवारयति।
यथोक्तं भगवद्गीतासु। ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रा
मयन् सर्वभूतानि यंत्रारूढानि मायया। तमेव शरणं गच्छ सर्वभा

वेन भारत। तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं। मत्तोन्यमी
श्वरं ज्ञास्यतीति मत्वा पुनर्भगवतोक्तं॥ मन्मना भव मद्भक्तो मद्याजी
मां नमस्कुरु। मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे। सर्वधर्मा
न्परित्यज्य मामेकं शरणं व्रज। अहं त्वां सर्वपापेभ्यो मोक्षयिष्या
मि मा शुच। तत्रैव च॥ अपि चेत्सुदुराचारो भजते मामनन्यभा
क्। साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः। पुनरेकादशस्कंधोस्व
पादमूलं भजतः परेशः। त्यक्तान्यभावस्य हरिः परेशः। विकर्म यच्चो
त्पतितं कथंचिद्धुनोति सर्वं हृदि संनिविष्टः। तत्रैव च। यदि कुर्यात्प्र ९

मादेन योगीकर्मविगर्हितं। योगेनैतद्देहेदेहो नान्यथ त्रकदाचन। योगा
ख्यः ज्ञानकर्मनत्याख्याः। अन्यथानूयत्रं प्रायश्चित्तादि। इति श्रीसंप्रदा
यप्रदीपे श्रीविष्णुस्वामीसुपात्रविल्वमंगलाचार्यश्रीवल्लभदीपविरोषेन
मार्गपाधिकजननतमो निवृत्तो प्रथमं प्रकरणं। उक्तंच। उत्पन्ना द्राविडे
नक्ति वृद्धिं कर्णाटके गता। क्वचित् क्वचिन्महाराष्ट्रे गूर्जरे प्रलयं गता।
१। युधिष्टिरराज्यसमायातं किंचित्कलौ गते द्राविडेषु कश्चिद्राजा वभू
व। येन धर्मेणाखिलं चारतवर्षं वशीकृतं। तस्य राज्ञः सकलचार धौरेयः
सचिवो ब्रह्मणो वभूव। तस्य ब्रह्मणस्यात्मजः श्रीविष्णुस्वामी सीत्

।भव श्रीशुकवाक्यमृताब्धीदोः श्रीगोपीजनवल्लभस्यांशाएवयोव
देशाः सततं भजेदितिशास्त्रात्।सान्हात्स्वरूपेणकामदेव।वेदार्थविद्या
यावत्तुमुखिः।बुद्ध्याबृहस्पतिः।धनवान्यथाधनदः।भोगवान्
यथापुरंदरः।किमधिकं।वेदोपवेदेतिहासपुराणोपपुराणस्मृत्यु
पस्मृतिवेदांगसांख्यवेदांतयोगमीमांसकवैष्णवशैवतंत्रादिवेत्ता
यथाकृष्णद्वैपायनः।साहित्यवात्स्यायनादिषु च।यथोक्तं पाद्मे।य
दाभगवतीसृष्टिः।स्थितौभवतिवैतदा।अंशेनभगवान्विष्णुः स्वात्मा
नं सृजति स्वयं।तमाश्रित्यजनाःसर्वेभक्तिराजोभवंतिहि।मैत्रीसंभे १०

बलीवर्दाय यदाश्रित्य भ्रमंति चाव वास्ते कलौ नाद्याः संप्रदायप्रवर्त्त
काः भविष्यंति प्रसिद्धास्ते युक्तं कलौ पुरुषोत्तमात् ॥३॥ तस्य श्रीस्वामिनः कदा
चिन्मनसि विचारः समजनि । कथमहं पितुरधिको गुणैर्भविष्यं ॥ राजसे
वया भविष्यामि । संप्रति भूमंडले यईशोस्म हृशाराजास्ति ताहृशोऽन्यो
नास्ति । सचिवेषु राज्ञः न ममतिरनुग्रहपात्रं यथास्ति ताहृशः सचिवो
न्यो नास्ति । अतः सेवार्थे देवेषु कोपि मृग्यः । तर्हि राजराजो धनदः सेव्यः
स्यात् । सोपीड्रानुयायी तर्हि इंद्रः । इंद्रोपि रुद्रानुवर्त्ती । अन्येपि यमाग्नि
वरुणादयः । तर्हि रुद्रः सेव्यः । तस्यापि पितृत्वेमान्व वे ब्रह्मास्ति न मब्रवी)

महादेवोस्तिश्रुतिः। तर्हि ब्रह्मैवेश्वरः सेव्यश्चा ब्रह्मापि श्रीनारायणनाभि
पद्मलब्धजन्मना श्रूयते तर्हि नारायण एव सर्वेश्वरेश्वर इति सिद्धं सोपि
मत्स्याद्यवतारैरवतीर्यात्मानं मन्यमान इव जपन्यजन्नन्वजन्ध्यायन्
श्रूयते च पुराणेषु परतंत्र इव अतः सर्वतोधिकोहं केमं वेश्वरेश्वरमारा
धयिष्यामीति निश्चयेनं जगाम पुनः पुनश्च विचारवान् ततो वेद
मूलशास्त्रेषु गरीयांसो वेदाः वेदेषूपनिषदः। उपनिषत्सु बृहदारण्यकं
माध्यंदिनीया शाखा सर्वसाधारणाः स्मर्ता इति स्मृतेः अतो यजुर्वेदस्यो
पनिषदियं सर्वेश्वर इत्युक्तः स मे प्रभुः सेव्यश्च स वा अयमात्मा सर्वस्य ११

वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति। यदिदं किंच
न साधुना कर्मणा भूयान्नो वा कनीयानेष भूताधिपतिरेष लोकेश्वर
एष लोकपालः। स सेतुर्विधरण एषं लोकानामसंभेदाय इति स
त्यकामं सत्यसंकल्पं सर्वज्ञं सर्वगं च विश्वात्मानं तं शक्तिमन्तं भक्तवत्सल
लं तं ईशं जगदीश्वरं सर्वात्म्युपनिषदो वदन्ति। परं तु तस्य नाम
रूपादि न ज्ञायते। कथं तं न जानीत्यमुच्यते। राजसेवा महाराजोपचा
रेणैव भवति। अत्रोपनिषदुक्ते सर्वेश्वरे नामरूपाभावे कामभक्तिः की
र्तिश्चान्न वक्तुं नाम यथा महाराजसेवके महाराजोपचारं विधिनाम

ऊ
हारा सेव्यते । यथा हं एतद्रूपमपि जगदीश्वरं परिचरिष्यामि । सर्वज्ञो न
केवलं सतः कृपालुः श्रीगोपष्ठितः । अतो दर्शयिष्यति स्वरूपं इदं इति नि
श्चित्य जनार्दनैः कृतवान् । मम स्वामिनोर्थे गृहारातं नूतनाशय शय्या
सिंहासनस्थ त्रचामरपादुकादंतन कर्पूरकस्तूरी सुगंधागरुजलपान २
पात्र भोजनपात्र धूपदीपनिराजन शयन भोजन विहार सज्जाच्छाद
न रथ नरवाहनाश्वगजाजवनिकावितानक्रीडोपस्करादि सर्वमिति
चकार । श्रीकृष्णोदयादारभ्य क्रमेण महाराजसेवकवत् न्यायेन प्रति
बोधदंतधावनकेशमार्जनादि महाभोगपर्यंतं अनुदिनं चकारप

रं भगवान्नू नग्रहणाति अगृहीते भोजनादौ प एश्चात्तापं चकार। पश्चा
दिति निश्चितवान्। अहो यावन् मत्कृतां सेवां सा हृद्गत्वा न ग्रहणाति ता
वदहं न भोजनं न पयः पास्यामि। अनुदिनं भगवदर्थं यद्भोजनादि कल्पि
तं भगवता न गृहीतं जलं शीघ्रं ये तत्क्षिपति स्म। एवं षट् दिनान्यतीतानि
तेने अस्थिषु मज्जसु प्राणत्यागः। चैतायां मांसापगमे द्वापरे रुधि
रहृदये। कलौ अन्नाद्यभावे एवं कलिकाले वरत्वात हृतं तद्ग्राम शरीरस्यान
मवाप। ततः स्वगतमिदमाह। अहो श्रुतिवाक्यप्रमाण्येन ईश्वरो सर्व
वशवर्ति स्वरूपालुपठितः। कथं मत्कृतां सेवां नग्रहणाति ज्ञातं कोपिम

यिशारीरदोषोवर्त्तते। अतःपरंक्लेशेनापिदिनमेकंसेवांकरोमि। य
दिभगवान्गृहमागततदाग्निप्रवेशंकरिष्यामीतिनिश्चित्यसप्रथमेदि
वसेभजनेकर्तुमारब्धः। यथास्थानंसेवासाधनानिस्थाप्यकपाटेपि
धायबहिः। स्थितः। ततोगृहांतर्भगवानाविर्बभूव। सेवकजनेनसह
। शृंगारस्थानेशृंगारसाधनानिस्वीकृतानि। ततोभोजनस्थानेभोज
नंकृतं। शयनस्थानेशयनमपिकृतं। बहिःस्थितेनविष्णुस्वामिनाश्रु
तं। द्वारमुद्घाट्यगृहांतःसमागतोभगवंतंददर्श। सतंवयस्तिकैशोरेद्वि
भुजेपीतवाससं। नवीननीरदश्यामंपद्मगर्भारुणलोचनं। ४. विरोष्ट १२

पुटन्यस्तवेणुवादनतत्परं शिखिपिछावतंसेनशोभितंवनमाल
याहारकंकणकेयूरमुद्रिकाभिरलंकृतं सुंदरंनिम्ननाभिंवक्षेमम
२ खलयायुतं ।३। स्फुरन्नूपुंझंकारवीरश्रीरस्तिकंमुदा ।कलीनाद्यष्टश्र
गाररसमूर्तिंमनोरमं ।४। पीतोत्तरीयसंवीतंत्रिभंगललिताकृति
गद्धवमंडलसंसर्गिलसत्कांचनकुंडलं ।५। पातुंगगुल्फारुणनख
व्रातदीधितिनिष्ठितं ।पाणिपादतलेपद्मंपद्मारुणनयान्वितं ।६।
सव्यदक्षिणतोदेव्योतत्रकांचनसंनिभे ।वयोरूपगुणोपेतेदृष्ट्वो
वाचमुदान्विता ।७। नगेंद्रशास्त्रदृष्ट्वांसगुणंज्ञानेमयोपनिंदुक
व प

सर्वेश्वरस्याधर्ययासेवाकल्पिताः अस्मोनिर्गुणात्वयास्वीकृतामकृता
सेवावैदिकतांत्रिकमार्गाणयेचाइहद्विविधरूपंनजंतीनमनेनत्वस
३ र्वेश्वरबुद्धिः। अस्संदेहनिराकरणेवयेवभवति। संशयंछिंद्धिशास्त्र
तेमत्वात्मानंप्रमाणीकुरु। पश्चाद्वौप्रणमामि। श्रीभगवानुवाच।
सोम्यमत्तोन्यईश्वरस्तवकोप्यस्तितेनत्वकृतासेवा। नस्वीकृताम
याचौरधर्मेगृहीतावेत्वदिकथंनरक्षिताश्रेयापितंविज्ञापयामा
मेदंउंदास्यति इति श्रुत्वापुनर्भगवतमाहदेवसर्वात्मनात्वांप्र
पन्नोस्मि। मत्कृपयामदीयंसंशयंछिंद्धिवत्त्वत्तोन्योईश्वरोनास्तिशास्त्र १८

संमत्या स्वकीयं माहात्म्यं कथयत् श्रीभगवानाह सोम्य सर्वेश्वरोहमस्मि
५२ ता वदुपनिसंमत्या शृणु तत्कृष्णीयं साक्षाद्ब्रह्मेति श्रुतेः। तथाथर्वणो
पनिषदि तत्कृष्णो वै परमं दैवं गोविंदान्मृत्युर्बिभेति। श्रीगोपीजनवल्लभो
भुवनानि दध्ये इति। तत्रैव वाक्ये नेजदेकं मनसो जवीयो नैनद्देवा आ
प्नुवन्पूर्वमर्शन्न तत्कृष्ण एव परो देवस्तं ध्यायेत्तन्नमेत्तं भजेदिति श्रु
तेः। कृष्णनाम्नः कृषिर्भूवाचकः शब्दो न निर्वृत्तिश्च वाचकः। तयोरैक्यं प
रंब्रह्म कृष्ण इत्यभिधीयते। यथोक्तं। बृहद्वामनपुराणे उत्तरखण्डे
ने लेखे च। नृपादीन्प्रति ब्रह्मणो वाक्यानि। षष्टिं वर्षत्यादित्रिंशछ्लोकाः

पुनर्भगवताविष्णुस्वामिने प्रत्युक्तं। सौम्यममसर्वेश्वरप्रतिपादकानि
वाक्यानि। वेदादिषुसंतिनवाविष्णुस्वाम्यर्वदत्। संतिवेदक शास्त्रब्रह्माणानि
ष्णाताः। पंडिताःसगुणंमूर्तेंदृश्यंलिंगं ब्रह्मनेतिनेतीविहायनिरा
कारंचिन्मात्रंउपदिशंति। तैरेवसिद्धांतेतवलोकरूपादितेषांमतेपूर्व
पक्षेनविष्यति। तदाकायुक्तिःशास्त्रीया। तन्निवारणायसौम्यतेशा
स्त्रार्थमाश्रित्यवदंति। परंतुमायावादिनोह्यसुराः। सर्वशास्त्रस्यहमे
व। तेषामसुराणांमतंपराङ्मुखीकरणार्थंतच्छास्त्रं। मदिच्छयैवप्रावर्त
त। तेतुजडंदनित्यंमन्यंते। कथंसच्चस्वरूपान्मत्तोजातमनित्यंनवति॥ १५

भूतानि

यतोवाइमानिजायंते। येनजातानिजीवंति। तत्प्रत्यभिविशंति तद्ब्र
ह्मेतिश्रुतेः। कारणानुमेयंकार्यंभवतीतिन्यायः। तस्मात्सत्यस्वरूपाज्जा
तेसत्यमेवपरंतुमन्मायामोहितमतयोसुरप्रकृतयाद्येतन्मतंपूर्वंद्विष
यंति। प्रपंचनित्यकरणेनगवड्जनसाधनंफलंचनित्यंभवति। तस्मि
न्नित्येज्ञानेनक्रोहठाश्रद्धाभवति। एतदर्थंतुवादिनोब्रह्मवादिनः।
सर्वंखल्विदंब्रह्मेतिश्रुतिःप्रामाण्यात्प्रपंचंनित्यंमन्यंते। यथाग्नि
ष्टोमेनस्वर्गकामोयजेत कर्मणाचित्तशुद्धिर्भवति। चित्तशुद्ध्यात्मज्ञा
नं। ज्ञानेनैवात्मप्राप्तेर्मोहइतिस्वर्गकामइतिमोक्षफलंदर्शितं। तद्वो

र्मर्यादेवासुरविरोधेषु मर्यादेवानां पक्षपातः श्रुतः। अतश्चतुर्भुजाद्या
कारे४

वनार्थफलश्रुतिरिति। तेषां सिद्धांते प्रपंचसत्यकरोक्तितद्वत्। एवं
शास्त्रे भवतु। परं प्रपंचो नित्य एव। मायेत्यसुरा इति श्रुतेः। भगवद्गी
तासु। आसुरप्रकृतीनां लक्षणं असत्यमप्रतिष्ठं ते जगदाहुरनीश्व
रं चतुर्भुजाद्याकारेषु असुराणां द्वेषा। निराकारप्रतिष्ठते। सोहमा
स्मीति मन्य~~मान्य~~मानाः हिरण्यकशिपुकंसवेनपौंड्रकादयो मत्तो
न्यो जगदीश्वरो नास्तीति वदंति स्म असुराविष्टा देवा ऋषयोपि सो
हमस्मीति वादीनि शास्त्राण्याश्रितानि स्वयं कृतवंतः। अथ ये केवलं दै
वीप्रकृतिं गतास्ते दासोहमस्मीति मां भजंति। यथोक्तं भगवद्गीता १६

श्री

तासु। महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजंत्यनन्यमन
सो ज्ञात्वा भूतादिमव्ययं। यावदविद्याबद्धस्तावद्वंत्वं। अविद्यानिवृत्तौ जी
वो ब्रह्मैव भवति। अतो बद्धदशायामेव जीवेश्वरयोर्भेदो मोक्षे जीवभावनिवृत्ते
एकमेवेति मायावादिमतं। अनित्यो प्रपंचो नित्यं ब्रह्मेति च सगुणब्रह्मोपा
सनया भक्त्यापि मुक्तिरेव पुरुषार्थः। निखिलमपि भक्तिशास्त्रं मुक्तिसा
धनमनन्यं ते नैतन्मतमस्माकं। ब्रह्मवादिनां जीवत्वे निवृत्तेपि ब्रह्मा
नंदरूपविभागेनांशांशीभावकसेव्यतया भेद एव मुक्तावपि। अत्र ह्या
विभागसयुज्जाइति रुचः। प्रमाणा इति श्रीवाविठ्ठलस्वाम्याह। जगत्रिःसं

शयोहमस्मि। त्वमेव सर्वेश्वरेश्वरः। पुनर्भगवानाह। सौम्य यन्मनसि स्थितं तत्त
द्ब्रूहि। विष्णुस्वाम्याह। श्रुतिषु भक्तिशास्त्रेषु प्रपंचस्य मिथ्यात्वं वस्तु जीवे
श्वरयोर्भेदत्वं दृश्यते। तत्किं भगवान् आह। तत्सत्यं परं मिथ्येति पदद्वैराग्या
र्थं वस्तुतो जीवेश्वरयोरैक्यं। शोकमोहभयादिनिवृत्त्यो पठितं तत्र को
मोहः कः शोकः। एकत्वमनुपश्यत इति श्रुतेः। अहमानंदमात्र करपाद
तलोदरो गुणत्रयातीतोक्षरादप्युत्तमः। पुरुषोत्तमः। एवामङ्क्रामस्स
मामस्मसमधर्मा मदंशा एव। न तु जीवत्वं तेषु। दृश्यमानभेदोप्यभेद एव से
व्यसेवकलीलयाहमेव सदा वर्त्ते। अथ मया यत्कार्यं तद्ब्रूहि। विष्णुस्वाम्या ११

हा देव अनेनैव स्वरूपेण सपरिवारस्त्वमत्रैव तिष्ठ। यथा राजसेवकवत्
त्वां परिचरेयं। श्रीभगवानाह। संप्रति कलिकालो वर्त्तते। न देवता सर्वं। तर्हि
थं कं मे देवो नमस्य। अतो मत्प्रतिमां कार्य। अस्त्यस्मिन्नेव पुरे विष्णुकर्मांशः
शिल्पिकर्त्ता। असौ मां दृष्ट्वा ममरूपसमां मत्प्रतिकृतिं करिष्यति। विष्णुस्वा ति
म्याह। देव एवं वेत्तर्हि वैदिकतांत्रिकोक्तदेवालयप्रतिष्ठासकलीकरणा
दौ कलिकाले पात्रद्रव्यश्रद्धासंपदादिविधिकथं पूर्णो भवति विध्यूनत्वे
कथं विश्वासः। पुनर्भगवानाह। दृष्टमात्रमत्प्रतिकृतिसाक्षाद्देहमेव मंत
व्यः सेव्यश्च विष्णुस्वाम्याह। एवं कृते मत्कृतं अशास्त्रीयं पाषंडं वेदबाह्यं मन्यं
देशकाल

ना
ते। महाराजन्। पुनर्भगवान्। यथा मंत्रन्यासप्रतिष्ठादौ तेन प्रतिमायां वे
दब्राह्मणवचनेन देवतासान्निध्यं करोति। तथा केवलेन प्रेम्णा देवतासान्नि
ध्यं करोतीति। वेदवाक्यानि संति। स होवाच याज्ञवल्क्यस्तस्मादात्महिता
य प्रेम्णा हरिं भजेत। वचसा तन्नामानि कीर्तयन्। इति श्रुतेः। न देवो विद्यते
काष्ठे न मृत्सु च न चाश्मनि। भावे हि विद्यते देवस्तस्माद्भावो हि कारणं। के
वलेन हि भावेन गोप्यो गावः खगा मृगाः। इत्येकादशस्कंधोक्तेः। हिरण्यक
शिपुना। कोऽस्ति वस्वामीत्युक्ते प्रह्लादेन सर्वत्रास्तीत्युक्ते। पुनर्हिरण्यकशि
पुना कस्मात्सोऽनदृश्यत इत्युक्ते हरिस्तंभात्प्रादुरासीत्। तत्र को मंत्र का प्र

निष्टा। किं सकलीकरणं केवलं न किंभाव एव। केवलं प्रेमभाव हीना
नां वैदिकर्तां त्रिकोक्तमार्गाधिकारः। यदुक्तोयं मार्गः श्रीभगवद्गीतासु
श्रीभागवतोक्त एव। अतः फलमार्गोयं। निगमकल्पतरोर्गलितं फलं। श्री
भगवन्मुच्यते। अतोयं मार्गो वैदिक एव न तु पाषंडिन अज्ञाशास्त्रीयस्त्र।
इति श्रुत्वा विष्णुस्वामिनाः सूत्रधारमाकारयित्वा साक्षाद्भगवंतं दर्श
वि यित्वा प्रतिज्ञतिः कारिता। पुनर्भगवता विष्णुस्वामिने प्रत्यक्षं कथितं सोम्यभ
गवद्गीता श्रीभागवतं मे शास्त्रं। अहमेव एक एव। तस्मुतन वास्मीति पं
चाक्षरवाक्येनात्मनिवेदनं मामेवमंत्रं महाराज पंचाक्षरविधिना सेवा एव १८
गो

कर्मयस्त्वत्संप्रदायी न्नृवायशोदा गोपी उद्धवादिवत् परिचरिष्यति मां
प्रतिमारूपमपि साक्षान्मत्वा तत्कृतां सेवां पुनर्ग्रहीष्यामि । यथा दशम
स्कंधे । श्रीभागवते । गताध्वनः श्रमौ तत्र मज्जनोन्मर्दनादिभिः । नीवीं व
सित्वा रुचिरा दिव्यस्रग्गंधमंडितौ । जनन्युपहृतं प्राश्य स्वाद्वन्नमुपला
लितौ । संविश्य सुखशय्यायां सुखं सुषुपतुर्व्रजे ।२। भागवतोक्तोयं
सेवामार्गः । वैदिकतांत्रिकविधानज्ञानवेदांतसांख्ययोगवर्णाश्रम
धर्मादियो भागवते हृदयंते । तेसवैत्त क्तिसाधनान्येव मुक्तेर्गरीयसी भ
क्तिगीताभागवतयोः फलं तात्पर्यं च । इत्युक्त्वा भगवानंतर्हितः । अथवि १९

ष्णुस्वामी भगवदुक्तक्रमेणानुदिनं सेवां चकार। नेन रूपया शिष्यसंग्रहो
पि कृतः येनानुगृहीतास्ते गोपीजनवल्लभं प्राप्ताः। विष्णुस्वाम्यथ स्वीयसंप्र | क
हेतो वर्णाश्रमधर्मरक्षार्थं त्रिदंडीयती भूत्वा भगवद्गतिं गतः। इति श्री संप्रदा
यप्रदीपे श्री विष्णुस्वामि चरितं द्वितीयं प्रकरणं। अथ श्री विष्णुस्वामी संप्र
दाये बिल्वमंगल नाम बभूव। बिल्वमंगलौ द्वौ बभूवतुः। एकः दक्षिणात्यः
स्वायस्याष्टोत्तरशतस्तोकसंख्याकं स्तोत्रं श्रूयते। एकः कार्ण्यां। एकोद्रा
विडे वा द्राविडदेशीयो विष्णुस्वामी संप्रदायी। काशीवासी द्वितीये जन्म
नि जयदेव नामा बभूव। येन श्री गीतगोविंदगानं कृतं। प्रथमं माधवानं

ला।द्वितीयजन्मनिविद्भ्रणः।तृतीयेबिल्वमंगलः चतुर्थेजयदेवः।कामकं
दला।शशिकला।काश्यांवेश्या।पद्मावतीतिक्रमादारन्य श्रीगोपीजनव
ल्लभाख्येतत्वेद्वयोरप्येकमत्यं।बिल्वमंगलेविष्णुस्वामीमार्गंप्रशासति
शिष्यतयाबहवोगोपीजनवल्लभचविदोबभूवुः।तदाभगवानूतत्वज्ञा
नेनधिकारिणोजनाःचान्यपुरातनीपाराणिकीकथामनुसस्मार।त्र
त्रेतांतरेश्रीमहादेवःकैलाशशिखरेसिद्धवटतरुतलेरत्नवेदिकांव्याघ्र
चर्मासिनेउपविश्यश्रीपुरुषोत्तमंसमाधिनाचिंतयामास।समाधौभग
वान्श्रीमहादेवंप्रत्याह।यथोक्तंपद्मपुराणे।द्वापरादौयुगेभूत्वाकलया

मानुषादिषु स्वागमैः कल्पितैस्त्वं वजनान्मं मुखानुकुरु। मांच गोपपर्यये
नस्यात् सृष्टिरेषान्तरोत्तरा। तदेव पुरादिष्टमपि मन्वावतितीर्षुर्विचत्र वाराणतस्मि
न्नंतरे दाक्षिणात्ये जनपदे कश्चित्। शिवभक्तो ब्रह्मणो बभूव सोप्यनपत्यः
ईड स्वतस्य शिवमाराधयतः शिवालये शिव आत्मानं दर्शयामास। वरं वृहि
प्रसन्नोसीत्युवाच। पुत्रं देहीति ब्राह्मणस्तमब्रवीत्। पुत्रादन्यं वरं वरया। पुन
स्तेनोक्तं पुत्रं मे देहि। तदन्यं न वृणो। पुनः शिवेनोक्तं। एको द्वादशवर्षायु
।अपरः पंचाधिकशतवर्षायुः। तयोर्मध्ये पुत्रमेकं वृणु। द्वादशवर्षायुः सर्व
गुणसंपन्नो भविष्यति। तदितरो महाजडो भविष्यति। ब्राह्मणो ब्रवीत् देवता

वत्स्यातथ्यं। पत्नीं प्रदास्यामि। शिवेनोक्तं हे द्विज गच्छ। स्थितोस्मि ततो ग
हं गत्वा। पत्नीं दृष्ट्वा। समायातः। आह च। देव सर्वगुणसंपन्नं पुत्रं मे देहि। शि
वोप्यब्रवीत। अहमेवास्य पुत्रो भविष्यामि। ततो गौर्यब्रवीत्। तव सेवार्थमहम
वतरिष्यामि। ततस्तद्ब्राह्मणपत्नी गर्भं दधार। गर्भधारणादनु मासेषु पूर्णे
षु पुत्रं जनयामास। शंकरदानत्वात् पिता शंकर इति नाम चकार। ततः
शुक्लपक्ष उडुप इवाशु ववृधे। संस्कारक्रमेणोपनयनमवापः। गुरोः स
कृन्निगदमात्रेण वेदान् सांगानधीतवान्। शास्त्राणि च स्वयमेव ज्ञातवान्
जन्मदिनादारभ्य महाकवीरभूत्। कवित्वशक्तिं स्तौति। कश्चिच्छिवं च। विष्णु

मपिक्कचित्। नावद्देवनाः साक्षात् नृत्वा वरान्ददुः। अतोमादयः सि
द्धयस्तद्वशेः भवन्। कस्यचिद्ब्राह्मणस्य गृहे देवती गोरी गोरीतेन विधिवद्विवा
हिता। गृहस्थेन तेन त्रैवर्गिको धर्मः प्रवर्त्तितः। श्रियै स्वयं प्रजे पुत्रस्य उपा
सनाकांडे विस्तारितं त्रिकालज्ञानवत्वात्। सर्वोपि मनुष्यलोकस्तदा के
स्थितः। ततस्तस्य जन्मतः एकादश वर्षाणि पतीतानि। प्राप्ते द्वादशे वर्षे पि
तरं प्राह हे पितः। अस्मिन्नेव वर्षे किमपि निष्टन्नाविकाश्यां यास्यामि अतः
ततः पत्न्या सह तेनोक्तं। आवामप्यायास्यावः। ततः शंकराचार्यः सर्वान्
शिबिका स्वारोप्य पत्न्या सह काश्यां जगाम। यदा काशी मध्ये प्रविष्टस्तं

दा कालज्वरः समजनि। ततो मणिकर्णिकायां स्नात्वा धर्म्मचर्द्दपद्येन स्तुत्वा प्राणाननुससर्ज। तदर्द्धपद्यं यथा निमज्जनानाथ नवाणर्वान्तःस्थित
रान्मया पोतइवासि लब्धः। तदनु तत्पितरौ महद्दुःखान्वितौ विलेपतुः।
तत्परिवेदनं श्रुत्वा गौर्यस्तत्रां तादयान्वितासीत्। पद्योत्तरार्द्ध गौर्यापठि
तं। तद्यथा। वयापि लब्धे भगवन्निदानीमनुत्तमं पात्रमिदं दयायाः। तच्छ्रु
त्वा शंकरो जीवितमवापपत्नीं प्रत्यब्रवीत्। वयाकथं मम जीवितं प्रार्थि
तं। जीवितोपि प्रव्रजीष्यामि। ततस्तेन संन्यस्तं। कुटीचरबहूदकहंसपरम
हंस इति चतुर्धा संन्यासः। मद्दिरामन्त्रवत् कटितटात् तेन वस्त्रं स्थितं नग्ना
२२

यते। यावत्तावत् शिखासूत्रे न त्याज्ये। काषायवस्त्रमपि न कार्यं इति श्रु
तौ संन्यासधर्म्मा पठिताः। यावत् शिखासूत्रे तावत् वेदवान् पुरुषः शिखा
सूत्रयोस्त्यक्तयोर्वेदोपित्यक्तः यो वेदत्यक्ते श्रीनारायणस्त्यक्त एव पश्चा
त्पाषंडो भवति। पुरा पुरुषोत्तमेन जननान्मद्विमुखान् कुरु इति शिवे प्र
त्युक्ते। तदेवावतारप्रयोजनं मत्वा शिखासूत्रे परित्यज्य काषायं वा
सः परिगृह्य एकदंडी बभूव। तदनु तच्छिष्यप्रशिष्यत्वेन बहवो भवन्
यथोक्तं। भगवद्गीतासु। यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स य
त्प्रमाणं कुरुते लोकस्तदनुवर्त्तते। तदनु। अथातो ब्रह्मजिज्ञासेत्यादि

व्यासस्त्राणि उत्तरीयमीमांसाकर्त्वे व्याख्यानानि अकृत्य धवि

चारे मायावाद तत्त्वकादौ अनाद्यौ स्तः । मायेत्यसुरा इति अकृत्युक्तेवा

त् । मायावादीमतमासुरमेव । यत्र निरीश्वर सांख्ययोग वेदांतज्ञान

गव प्रतिष्ठितं । महात्मानस्तु मां पार्थेति जडुः तेन । तद्वौद्दमतं । एतस्मि

न्नेते गुर्जरदेशे अणहिल्लपत्तननामधेये कश्चिद्राजाबभूव । तत

स्यात्मजः कुमारपालनामासीत् । तं कश्चिज्जनः श्वेतांबरो हेम

सूरिनामा पाठयति स्म । एकदा तेन राजकुमारेण रात्रे स्वतुर्थयामे

संप्राप्तचिद्रूमंडलंगच्छन्तमिति । स्वप्ने दृष्टं । जिनशालायामागत्य प्रबुद्धे २७

स्र

नपाठकपृष्टासंप्रति मयेदृशः स्वप्नो दृष्ट इति। ततश्रुत्वा हेमश्ररिणादु
र्वचोभिर्भर्त्सितो रोषं प्रापितः ततो रुष्टः कुमारः स्वगृहे गतः पश्चान्निद्रां न
लब्धवान्। राजपुत्रेण ततो मनसि चिंतितं। उदिते सवितर्येनं दहनिष्या
मि। यन्मां निरपराधं दुर्वचोभिर्निराकृतवान्। ततो हेमसरिणासौ स्वशि
ष्यप्रेषयित्वा संमानितः। इति दृष्टस्वप्नो राजपुत्र यत् स्वप्ने त्वया दृष्टं
ते सप्तमे दिवसे तव राज्यं भविष्यति। यदि स्वप्नदर्शनादनु निद्रा याति
तर्हि स्वप्नो निष्फलो भवति। अतो मया रोषितोसि। यदि तव राज्यं
भविष्यति तर्हि मदाशावशेन तया भाव्यं। भविष्यामीति राजपुत्रः

प्रतिजज्ञे। ततो गुर्जरदेशे कालधर्ममवाप्तः। कुमारपालो राजा ब
भूवः। ततो हेमसूरिवचनात् स्वदेशमध्ये मीमांसक बौद्ध पाशुपत
सांख्ययोगवेदांतसंज्ञानि वेदमूलानि षट्दर्शनानि नाशितानि नायः
। एतस्मिन्नंतरे श्रीसूर्यस्यांशो देवप्रबोधनामा गौडे प्रादुर्बभूवः।
हृ श्रीवेदद्वैपायनशिष्यो जैमिनिरिति तस्यांशो भट्टाचार्यो बभूव।
ताभ्यां काश्यामागताभ्यां इति श्रुतं। जैनपाखंडेन गुर्जरदेशे नाशि
तो वैदिको धर्मः। ततस्तावुभावपि जैनवेशं विधाय गुर्जरदेशं समा
यातौ हेमसूरिणा स्वाश्रमं प्राप्तौ दृष्टौ पृष्टौ च कौ युवामिति। तावूचतुः २६

आवां जैनदीक्षाकामुकौ तवांतिकमायाते । हेमसूरिराह । युवां वर्षं या-
वत्स्वनीक्षार्थां परिक्षां कृत्वा शिष्यौ करिष्यामि । ततो वर्षं यावत् ताभ्यां
हेमसूरिसेवा कृता । उत्पादितो विश्वासः । ततः एकदा हेमसूरिणा
स्वेष्टदेवता पद्मावतीशक्तिर्नित्यं समाराध्यते तस्याराधकाले तावपि न
मध्ये नीतौ । यथा कोपि न जानाति तथा मदिरापानं कर्त्तुमारब्धं ताभ्यां प
मदिरा दृष्ट्वा देवप्रबोधेन त्वया पीता । तद्दृढेन प्रतीक्ष्यं इत्युक्तं । तस्या-
नादनु हेमसूरिणा वेददेवब्राह्मणाय ज्ञानदानमारब्धं तदा मन्त्राचार्य-
स्य नेत्रयोरश्रुबिंदवः पेतुः तद्दृष्ट्वा ब्राह्मणोयमिति हेमसूरिरुवाच ।

अहिंसैव जैनशासने मुख्या। अतो नायं हंतव्यः। उपरितनभूमौ रक्ष
णीयः। यत्रासौ रक्षितस्तत्र तस्य पुस्तकसंग्रहः। आसीत्। तत्पुस्तका
न्यालोकयतानेन ज्ञातं जैनमंत्रैरनेन राज्ञा वञ्चीकृतः। राजगृह
समीपे हेमस्तरिवसतीरासीत्। तस्य राज्ञः काचिद्राज्ञी जैनधर्मपरा
ङ्मुखी वर्त्तते स्म। सा नित्यं शालिग्राममर्चित्वा भुंक्ते स्म तदा निश्चये
कदापाठितं। किं करोमि क्व गच्छामि को वेदानुद्धरिष्यति। तच्छ्रुत्वा भट्टाचा
र्येणोत्तरार्द्धं पठितं। मा विषीद वरारोहे भट्टाचार्योऽस्मि भूतले। एव
मुक्त्वा तस्मादधः पतितः। यदि वेदाः प्रमाणं स्युस्तर्हि पतनेन मृत्युर्मास्तु। २५

।य। दीति संदेहवचने एकमछिद्रं विनिर्गतं। तदनु यथा कोपि न जाना
ति तथा पत्तने हृनिशं चचार। एकदास्मिंश्चिद्धारामे रहसि तुलसीवृ
क्षो दृष्टः। ततस्तत्र स्थितः। ततः सायंकाले पुष्पवणिक् समायातः
स तुलसीपत्रं गृहीत्वा पुनः सुपिहितं कृत्वा जिगमिषुरासीत्। त
दा नहूेन गृहीतः। आह च। भो मालाकार यो जैनादन्यं धर्ममा
चरति स कोटवो राज्ञा हन्यते। तत्कथय। कस्यार्थमियं तुलसीतरुः
पुष्पवणिक् आह। जैनदेवैवमुख्याव्वमपि जैनोसि। श्रं राउ ह्लो
लेन निवेदनीयं। नहू आह सत्यं वद कोपि वैष्णवोस्ति। स शपथं न कु

मदीयं लिषितपत्रं तव जायाहस्तेन तस्यै दयं दास्यामीति मालाकार आह

घयिष्यामि। पुष्पवाटिक आह। अस्ति राज्ञ्यै कामतृ आह। ततः किं
करोमीति श्लोकं लिखित्वा प्रेषितवान्। राज्ञ्यापि तं दृष्ट्वा तमाकारयामा
स। ततो सौ जैनं वेषं कृत्वा राज्ञीगृहे गतः। अन्यथा गंतुमशक्यत्वा
त्। मध्ये गत्वा ब्राह्मणवेषं कृत्वात्मानं दर्शयामास। ततोऽजहस्तिदू
हैः लक्षितो वासीत्। पश्चाद्याहृशोंगदः हेमसूरिणा जैनवशीकरणमं
त्रैः कृत्वा राज्ञो बाहौ बद्धस्ताहृशोंगदं कारयित्वा राज्ञीहस्तेन राज्ञो बा
हौ बद्धः। जैन कृतो गृहीतः। ततो वेदिकानिवारतो राज्ञः कालज्वरः
समजनि। तद्धेतुर्हेमसूरिः पृष्टः। कथं विज्वरो भविष्यामीति। हेमसू २६

राज्ञानीतं धर्मतः प्रजयामास ततो

ता

रिरह। दत्ते कालपुरुषदाने विज्वरा न्नविष्यसीति। नलकालपुरुषं नि
र्मापय। कमपि ब्राह्मणं बटुकं शालाबाह्ये तोयपिंडोपवेदिधारय्य वा गाय
त्रीमंत्रं कथयित्वा। तस्मै कालपुरुषदानं दापितं। हत्ते दाने राजा वि
रा॰श्रा ज्वरीनूवः। ततो मनसि विकारः समजनि। न ब्राह्मणा समं किंचिज्जि ८
ये स्योदीने दत्ते विज्वरोहमासन्। ततः पुनरेव [illegible] प्रबोधाचार्यः हत ततः प्रा
यश्चित्तः श्रीनृसिंहं प्रसाद्य पत्तनपुरं समायातः। बटुकः शिष्यो ह्री
विकारूढः। स्तौ सरस्वतीतीरे पाकं कर्तुमारब्धा। तदा हेमसूरि शिष्यैः
समागत्य यथान्नमपक्वं जवति तथा मंत्रविद्यया कृतो। राज्ञी दृष्टे न

या

ह्राचार्योपि देवप्रबोधाचार्यस्समायातः। कुशलादिपृष्टं ततो न ह्राचार्येण
नालिकेरीफलान्यभिमंत्र्य होपतौः प्रहितानी वप्रेरितानि जैनानां शिरः
सु युगपत्पेतुः। तैर्हन्यमानैः समेत्य तेषां पाके स्वमंत्रचारो हृरीतन
ततो द्वितीयदिवसे तत्ताङ्किकाः सर्वे ब्राह्मणराजसभां जग्मुः। तान्नागा
तान् विलोक्य राज्ञा प्रणामादिसत्कृतिः कृता। तद्दृष्ट्वा हेमसूरिश्चव कि
तोबभूव। ज्योतिर्विदा ब्राह्मणोन पंचांगतिथ्यादिश्राविता। स्मार्तैकृ न
षितमघामावास्याश्राद्धंकरणीयमिति। तच्छ्रुत्वा हेमसूरिराहाय
द्यपौर्णमासीनतेवक्तं हिशानहस्तन्निम्लेगत्तेमत्तशिष्यपुस्तकोहंप्र २७

विशामि। अन्यथा त्वं। तथेत्योमिति निद्रां प्राप्तो रंगीलः। ततो हेमसू
रिणा स्वेष्टदेवता पार्श्ववर्ती स्मरचानस्या ऊँडलं प्रार्थयित्वा निशामु
खे गगने चंद्रबिंबवद्दर्शितं। तत् दृष्ट्वा सर्वे जनाः पौर्णमासीं मेनिरे।
ततो देवप्रबोधाचार्येण स्वेष्टदेवता नृसिंहवचनेन तत्तु शक्तिकृतं कुं
डलं विज्ञाय राज्ञे निवेदितं। देवद्वादशयोजनावधिप्रकाशोऽस्य नाधिकः
तद्राज्ञा विलोकिनेन तथैव जातं। ततो हेमसूरिणा विचार्य गर्त्तं प्र
विष्टुमारब्धं। ततो गर्त्ततलस्थे हेमसूरौ सर्वैर्जनैः समेत्य धर्मस्य त
त्वं पृष्टं। तेन च बहुमाणमुक्तं। मिति। हरिर्भागीरथी विप्रा विप्रा भागीरथी

हरिं।नागीरथीहरिविप्राः सारमेतज्जगत्त्रये।इत्युक्त्वेमण्डिगीत्तः पूरितः
ततो ये पूर्वं नानादेशेषु गता ब्राह्मणा द्वयस्ते पुनः समागताः।ततो व
त र्णाश्रमनन्दनो धर्मः समावर्त्तं गुर्जुरदेशे वेदाः प्रवृत्ताः पूर्वं प्राप्तो वैष्णव
शैवदर्शनौ नप्रवृत्तौ महाचार्यस्य मीमांसकत्वात्।मायावादिवेदांत
स्यापि प्रवृत्तिरभूत्।यदा महाचार्यैर्ज्ञातं ओंडलमिदं पश्चाव त्याश्वंड
विवाचितेनदा पद्मापद्मावती सरस्वत्येव।सा शांप्रान्नमावतेताएरति
सा महाचार्यस्य सुताभूत्।ब्रह्मरांशः सुरेश्वरनामा कश्चिद्दहस्थो
तेवासी आसीत्।सा तस्मै पत्नी दत्ता तया सार्धं मसौ भट्टमतानुसारे २८
ई

एग्रहाश्रमो विनकर्मण्येवं चकार । काश्यपांतावसतिस्मृतात
तो गतैः स्वमनसि विचारितं । मया गुर्जरदेशे वेदमार्गस्थापनीयं जै
नशास्त्राण्यवलोकितानि । पाषंडशास्त्रावलोकनमग्निप्रवेश इति के
ग्निं एवः । ततः प्रयागे समेत्य अग्निं प्रवेष्टुमारब्धौ । तदा तत्र शंकराचा
र्यः समायाताः । विवदिषुरहमस्मीत्युवाचा तदा गतैरुक्तं । वयाः
वेद काश्यपांगतः [illegible] जामातास्ति । विवादं [illegible] र । [illegible]ती[illegible]ति
अहमग्नौ प्रवेक्ष्यामि । ततः शंकरः काश्यपांगतः सुरेश्वरस्नैः सार्द्धं
विवादं चकार । सामगश्च स्थानत्रयपरिगतौ व[illegible]ता शंकरपराजयं प्रा
न

तः पुनः २ हस्थो भवति सुरेश्वरः पराजित एकदंडी भवतीति पतोः
ऽतः। भट्टमतखंडने शापदानवैरवात्। ततः शंकरो गोकर्णा ह्म
ए शिवक्षेत्रदर्शी स्पोंजगाम। तत्र गत्वा शिष्यचतुष्टयं प्रत्युवाच।
चतस्रषु दिक्षु मुख्या नाम्नः भविष्यद्विग्वासर्वमायावादी सिद्धांत
स्थापनीयः संन्यास शिखासूत्र परित्यागे एकदंडो वा इति रात्रौ शि
ष्याना माज्ञा दत्ता। ते राज्ञा शिरसि धृता प्रातः प्रयाणं भावि तेषां म
ध्ये एको मधुनामा भवता सोपि शंकराद्गृहीत संन्यासात स्पानि शि
श्रीरामचंद्रः प्रादुर्बभूव।। वाक्यमाह।। मध्योवयाशंकरवचने नस्था

नव्यायतोनवान्हनुमदंशः। चै वैष्णवसंप्रदायेवर्तीर्णः। शंक
रकृतव्यासस्त्रभाष्यमुत्तरमीमांसालक्षणांपूर्वपक्षीकृत्यतत्त्ववा
दिसिद्धांतानुसारेणपुनर्व्यासस्त्राणिव्याकरु। तत्त्ववादिसिद्धांतं
स्वयमुपदिष्टं। ततासौशंकरदर्शितिमार्गविहायश्रीरामदर्शितमार्ग
णवैष्णवसंप्रदायंप्रवर्त्तयामास। शंकरमतेनत्संप्रदायिनामद्यापि
विरोधः। इतिसमासतोमध्वार्यसंप्रदायोत्पत्तिः। बिल्वमंगलतः। पश्चा
त्पूर्वंड्राविडेकश्चिद्रामानुजइतिब्राह्मणोबभूवातस्यलक्ष्मीसमाराधय
तोलक्ष्मीप्रसन्नाभवत। वरंवरंब्रूहीत्युवाचातेनोक्तंदेवीभगवद्धर्मविदात

नस्त्वया गरुड आज्ञाप्तः। ततो गरुडेन तस्मै नारायणीयं सिद्धांतं समर्पि
तं। तस्मात्संप्रदायः प्रावर्त्तत। ते वैष्णवाः अद्यापि दक्षिणस्यां दिशि प्रसिद्धाः
तस्मिन्नेव संप्रदाये केचिद्धरिहरोपासकाः। अगस्ति परशुराम कृताः श्री
वैष्णवाः श्रूयंते। इति रामानुज संप्रदायोत्पत्तिः। अस्ति दक्षिणापथे पांडुर
पुरं नाम नगरं। तत्र श्री विठ्ठलाख्यं भगवत्स्वरूपं। तस्मिन्पुरे कश्चिन्निंबा
दित्य नामा ब्राह्मणो बभूव। तस्मै श्री विठ्ठलेन स्वसिद्धांतं उपदिष्टं। ततः
सोपि तत्सिद्धांतानुसारेण स्वसंप्रदायं प्रवर्त्तयामास। एवं श्री विष्णुस्वामी
रामानुज मध्वाचार्य निंबादित्य इति चत्वारः संप्रदायः। प्रवर्त्तका दाक्षि

णात्याः। उपनिषद्गीताभागवतव्याससूत्रभाष्यं चतुर्भिः स्वस्वसिद्धांता
विरोधेन कृतमस्ति निबंधश्च पृथक् पृथक् चतुर्षु संप्रदायेषु स्वस्वाचा
र्यकृतो निबंधो वर्त्तते। यद्वाक्यतो नित्यनैमित्तिकभक्तिकार्येषु स्वे स्वे सं
प्रदाये प्रवर्त्तते यथोक्तं पद्मपुराणे च वारस्ते कलौ भाव्या संप्रदाय प्रव
र्तकाः। चत्वारस्ते कलौ भाव्या ह्युत्कले पुरुषोत्तमात् तद्यथा। एकदा
मध्वाचार्यः श्रीपुरुषोत्तमायतनं जगाम। ये भगवत्सेवकाः ब्राह्म
णास्तान् प्रत्युवाच। यूयमदीक्षिताः अदीक्षितैर्भगवत्सेवा न का
र्येति तदा नैरित्युक्तं। श्रीजगन्नाथस्याज्ञया दीक्षांगं दीक्षामंत
स्याम

दा श्रीजगन्नाथेन मध्वाचार्यप्रत्युक्तं। नरोषं मदीयान् वै दीक्षिता
न् करोषि। एते दीक्षिता एव। मध्वाचार्यो भगवंतं प्रत्याह। अदीक्षित
स्य वामोरुकृतं सर्वं निरर्थकं। पशुयोनिमवाप्नोति दीक्षाहीनो मृतो
नरा इति शास्त्रे कथमुक्तं भगवानाह। एतच्छेत्रादन्यत्र दीक्षिता
एव वैष्णवा। अत्र मदिच्छयैव प्रधानाः। मध्वाचार्य आह। के वैष्णवाः
के अवैष्णवाः। इति मया कथं ज्ञायते। भगवानाह। ये संप्रदायचतुष्टयांतः
पातिनस्ते वैष्णवा। मध्वाचार्य आह। के ते संप्रदाया। पुनर्भगवानाह॥
विष्णुस्वामी १ एको द्वितीयो रामानुजः २ तृतीयो मध्वाचार्यः तुरीयो नि

बादित्यः ४। ए ते संप्रदायेषु ते वैष्णवाः इति जगन्नाथवाक्यात् कलौ संप्र
दायाश्चत्वारः प्रसिद्धाः। चत्वार उपसंप्रदायाः। एकस्यैतन्यः। द्वितीयो
स्वरूपः। तृतीयो प्रकाशा। ३। नंदः। इति विष्णुस्वामिन उपसंप्रदायस्यैतन्यः
रामानुजस्य संप्रदायो नंदः। मध्वाचार्यस्य संप्रदायो प्रकाशः निंबादित्य
स्य संप्रदायो स्वरूप इति प्राच्याः। स्वरूपप्रकाशो विच्छिन्नौ कालेन। एष
च बलिष्ठाचार्याभावात्। शास्त्रव्याख्याननिबंधादिन वर्त्तते। एषु मूल
संप्रदायांतःपातिन एव परंतु पूर्वाचार्यसिद्धांतनो वैलक्षिण्येन स्वरू
पविवर्त्तनादयः संप्रदाया इत्युच्यते। गरीयसी केवलमीश्वरेच्छा। अत्र

सम्प्रदायादिषु को विचारः। इति श्रीसंप्रदायप्रदीपे विष्णुस्वामिस्नेह
पात्रे बिल्वमंगलावर्त्तौ श्रीवल्लभप्रदीपे सर्वसंप्रदायोत्पत्तिप्रकरणं तृती
यं॥ श्रीवल्लभो यदि मदीयहृदीश्वरोऽस्ति श्रीगोपिकाहृदयपल्लवराजहं
सः। सत्येन तेन मम वाचि तदीयवृत्तं सर्वं प्रकाशमुपयातु यथार्थतोऽत्र।
अस्ति दक्षिणापथे तिलंगाभिधो जनपदः। यत्र ब्राह्मणाः कलिपराभू
य वैदिकधर्ममनुतिष्ठंति। यत्राग्निहोत्रयज्ञकुंडेषु हविषि हूयमाने धू
मांधकाराच्छादितदृष्टिः कलिर्दूरतरं पलायते। यत्राद्यापि वेदाः सर्वो
परि वर्त्तंते। तत्र सकलब्राह्मणगुणालंकृतश्रीलक्ष्मणभट्टकुलकम ३२

लविकाशमात्तेउ श्रीवज्रलाचार्यःप्रादुर्बभूव।अहोकलिर्दुर्गतोऽधुनर्ध
र्मोऽपिवृद्धिंगमिनश्च वैदिकः।नकिहरौसम्यग्वर्त्तनैवचाकाशवाणापाहृय
दीयजन्मनि।१।एकदातिलंगदेशात्।श्रीलक्ष्मणादीक्षितैःकाश्यांस
मागतै।ततंश्चाश्रमक्रमेणगृहाश्रममवाप्ययथोक्तंगार्हस्थ्यंपाल
यामास।एतस्मिन्नंतरेधर्मपत्नीलता धानादिसंस्कारगर्भंदधार।त
द्दिनाद्दारभ्यसप्तमेमासिप्राप्तेकाश्यांपरचक्रमाजगाम।तद्भयात्
सकलमपिपुरंपलायितं।तदातत्पत्न्याःपलायन्त्याःपथिमहावने
सप्तमासीयोगर्भोविश्रंसितः।ततोमहातरुतलेतरुपत्राण्यास्तीर्यत

त्वा आमगर्भं मुक्त्वाऽत्राथ मनयप्रदेशं गताः। ततः काश्यपाः सकाशात्
परचक्रं निवृत्तं स्वास्थ्यं जातं। तदा लक्ष्मणदीक्षित पत्नी काश्यपां प्रत्या
यंती पुत्र गर्भो मुक्त तत्रायाता स्थाने प्रत्युवाच। हे तां सर्वे तिष्ठंतु पश्या
मि मया त्वं गर्भो मुक्तः। तस्य कीदृशी वृत्तां ततः। इत्युक्त्वा मर्त्यैः सार्धं दिदृ
क्षु प्रस्थिता। यावत्तरुतले तोदं पतीगतो ता वत महाज्वाला विराजि
तं तत्राग्निपुंजं ददृशातु। आह तु सा। अहो महाद्भुतमिदं लक्षणं नाऽश्य त्र
त्वामगर्भो मुक्तः। ततोऽग्निः प्रज्वलन्निव दृश्यते। अतः अमानुषोयं
गर्भोऽजीवन्नवर्ति। अथैनं नीवान्हं यास्यावः। इत्युक्त्वा गर्भं नीत्वा ३३

४ति

गृहं प्रास्थितौ। गृहे समागम्य महद्वैद्यान् दृष्ट्वा गर्भं पालयामास तुः। तद
नु संयोगतो विवृधा। ततः सकलदेशारीत्या सर्वविद्यं नवा तु। पिता व
ध्वज इति नामचकार। एवं वक्रेण गर्भादृष्टमे वर्षे जाते ततोपनयनो
वेदमधितवान्। तदा तस्य मानुषी प्रज्ञां दृष्ट्वा लक्ष्मणेन हृः स्वहृदि
विचारितं। अहो संप्रति कलिकालः पुत्रोयं मे महानुभावः कोयमतीव
तो इत्यहं न वेद्मीति संचिंत्याग्निहोत्रशालायां नूमौ शयनं चकार त
दा रात्रेः पश्चात् यामे श्रीमदानंदमात्रकरपादमुखो[illegible]दरादि भगवत्
श्रीपुरुषोत्तममुखमेवाग्निर्विप्ररूपः स्वप्ने प्रादुर्बभूव। आह च। अहमग्नि

र्भगवदाज्ञया तत्र पुत्रतां गतः। तदनुभावैर्निस्संदेहो जवाः तत्तु त्वकाग्निरं
तर्हितः। न तु स्वप्रवृत्तान्तैर्लक्षणैर्महैः स्वपर्यापावादीनां। तदनुक्रियत्का
त्वे गते सति लक्षणादीक्षितः कालधर्ममवाप। ततस्तत्पारलौकिकं पार
यित्वा। कालक्रमेण सांगान्वेदानधीत्य सर्वशास्त्राण्यधीतवान्। श्रीशेष
पाणिनीव्याख्यां समाप्य व्याससूत्र जैमिनीसूत्र गौतमचाणादकपिलपा
तंजलीसूत्रव्याख्यां समाप्य पौरुषेयीसमान्याम वलोक्य नातिप्रसन्नमना
बभूव। ततः श्रीवल्लभो वैष्णवतंत्रं प्रा [illegible] कर कौमारिलमोड्डलमतादिशा
स्त्राणि विष्णुस्वामिरामानुजमध्वाचार्यः। निंबादित्यप्रोक्तत्यादिनाप ३६

स्तिद्धांतं परिज्ञाय कारुण्यं तेषामप्रवृत्तौ । हृष्टाद्दक्षिणापथे तत्प्रवृत्तिं श्रुत्वा
दक्षिणापथं प्रस्थितः । तत्र गत्वा तानि सर्वाण्यवलोक्य विद्यानगरं समायातः
तदा तत्र बुक्कनामा राजा वर्त्तते । तत्र मध्वाचार्यमागतिमिरनाशनप्रदी
पः श्रीव्यासतीर्थनामा यतिर्वर्त्तते । मायावादिगजानीकनाशने सिं
हविक्रमः । तद्वैपायनो व्यासो व्यासतीर्थः कलौ युगे । तदा राजसभा
यां मायावादितत्त्ववादिनोर्विवदमानयोः षडहान्यतीतानि । तदा श्रीवर्द्ध
नेन श्रुतं राजसभायां विद्याविवादोस्तीति ततः श्रोतुकामः राजसभायां
प्रस्थितः । तस्मिन्विवादे मायावादिना तत्त्ववादी जितः । तदा श्रीवर्द्धनो

वि

ब्रवीत्॥ रमायादिनू मयिजिते जितं॥ मायावाद्यादाव मेघे हि॥ श्रीवल्लभे
न सह तस्य विवादः समजनि श्रीवल्लभेन मायावाद्यप्रयासेन जितः॥ त
त्र राजप्रसादं जंडुवं पूर्वं विदमानयोः रुनयोर्द्वायघे छयाप्रस्थानुमा
रेनो ततत्र वाव्यासतीर्थैः समागत्य स्वशिष्येण राज्ञा सह श्रीवल्लभगो
त्रे नामादिश्य त्वा प्रार्थितं॥ अत्र भवद्भिः कियत्कालं स्थातव्यं॥ अयं
राजतुलापुरुषदानं करिष्यमाणोस्ति॥ ततस्तवद्भिरावार्यैर्वक्तव्यं॥ ततद्वि
येतं कालं श्रीवल्लभेन स्थितं॥ ततकारयित्वा तुलापुरुषदानसुवर्णयेहि
त्वाश्रीदेवद्रव्येण रत्नरचितं मेखलां कारयित्वा श्रीविठ्ठलाख्यस्य भगवतः ३५

समर्पिता अर्द्धद्रव्यस्यार्धेन पैत्रकं स्तोदं नवानूं चतुर्थांशो वर्त्तमानो गृ
हे गार्हस्थ्यो यज्ञक्रियायां नविष्यति। तत्र व्यासतीर्थैः श्रीवल्लभानुजा वाम
लौकिकमवलोक्य मनसि विचारितं। यद्ययमस्मत्संप्रदायी नवती तर्ह्य
स्मन्मार्गरक्षा समीचिना नवेत्। तस्मादस्मै संन्यासं दत्वा स्वगादी कां दत्वाचा
र्यपदवीमभिषेचयिष्यामि। तत्स्मिन्नंतरे विष्णुस्वामीसंप्रदायी द्राविडदेशी
यो बिल्वमंगलः। श्रीवल्लभस्य स्वप्ने आत्मानं दर्शयामास। आह च। त्वया
व्यासतीर्थशिष्येण नाव्यं अहं च भगवतः श्रीदिव्यकिशोरमूर्त्तेः श्रीकृष्ण
स्य वाक्यात्तव हृद्दर्शनकांक्षयातिरोभूयस्थोस्मि। तयास्थित्यास्मप्तशत वर्षा

ष्पतीतानि। श्रीविष्णुस्वाम्यनंतरमस्मिन्मार्गे सप्तशताचार्या बभूवुः
परमोदं। यदा भगवदाज्ञया श्रीमहादेवांशेन शंकराचार्येण भगवन्मार्गा
सर्वोपि जनोद्भ्रामितः। तया मया श्रीविष्णुः प्रत्युक्तः न यमां निज भक्त्यपा
र्थमिति। तदा भगवतोक्तं। भविष्यत्यस्मिन्युगे मन्मुखवाग्न्यवतारो वल्लभ
नामा। तस्मिन्नहमाविश्य जीवानां बतुर्लक्षं केवलभक्तिमार्गेण उद्धरि
ष्यामि। विष्णुस्वामिमतं सर्वं तस्मै प्रोक्त्वा पश्चान्मत्समीपत्वं मायास्यसि
रामानुजमार्गीयास्तु ष्टिः पाद्मकल्पीया। मध्वाचार्यमार्गीयास्तु ष्टिः श्वेत
कल्पीया। निंबादित्यमार्गीयास्तु ष्टिः सौरकल्पीया। विष्णुस्वामिमार्गीयास्तु
ष्टिः 35

या २

स्वारस्वत कल्पीया। पद्योक्तेः। सिद्धांते रामानुजीयानां। लक्ष्मीगरुडाद्यो
प्यार्या वायुहनुमद्भीमसेनावतार मध्वाचार्य मार्गीयाणां नारदरामाय
णीयं सिद्धांते श्रीभगवद्गीता श्रीभगवतोक्तेः सिद्धांते विष्णुस्वामीमार्गी
याणां श्रीसूर्यमंडलस्थ। हिरण्मयपुरुषोक्ते ऋग्वादिनां सिद्धांते निंबा
दित्यमार्गीयाणां। नदेवोपास्यरूपं श्रीमल्लक्ष्मीनारायणो। रामानुजी
यानामुपास्यरूपो। श्रीरामचंद्र। लक्ष्मणोतत्त्ववादिनां विष्णुस्वामि
मार्गीयाणांनु श्रुकवागमनाद्यंबीडुः श्रीगोपीजनवल्लभ एव अग्ना
ग्निराचार्यो भगवन्मुखं नारदीय पंचरात्र वैषानसासवुक्ते विधि

नादीक्षापूजादिसंप्रदायत्रये श्रीविष्णुस्वामीमार्गेणात्मनिवेदनपू
र्वकं प्रेमैव भक्तिमार्गः संप्रत्यस्मिन् मार्गे या अपि शंकरमायया च्छन्नाः
। अस्मिन विद्यानगरे श्रीविठ्ठलाख्यः पुरुषोत्तमोस्ति। असावेव भ
वतां आत्मसमर्पणं कारयिष्यति। ततो विष्णुस्वामिमार्गः प्रकाशनी
यः। इत्युक्ते श्रीवल्लभैः प्रबुद्धं॥ ततः प्रभाते श्रीवल्लभेन व्यासतीर्थ
स्याग्रे कथितं। तच्छ्रुत्वा व्यासतीर्थैरुक्तं। तत्वं स्वसिद्धांते मध्यमुप
दिश। श्रीवल्लभेनोक्तं। न तु त्वमहमुपदेष्टुकामः। एतस्मिन्नंतरे उ
भयोरपि आत्मनिवेदनं श्रीविठ्ठलनाथेन स्वप्रकारितं। श्रीवल्लभ ३७

स वैवितंति ३

प्रति श्रीविठ्ठलनाथेनोक्तं भवद्भिर्विष्णुस्वामिमार्गोंगीकर्त्तव्यः। विष्णु
स्वामिकृतस्कृतिव्यासस्त्रगीताभागवतभाष्यनिबंधादिकालेनोत
र्हितं। अतोभवद्भिः लक्ष्मणद्वैपायनोद्धवबिल्वमंगलादिवचनं निश
म्यपुनः स्कृत्यादीनां भाष्यं श्रीलक्ष्मणविष्णुस्वाम्यभिप्रायेण भवतीयं
। ततोग्निर्वागीश्वरः स्वमनसि मार्गोयं तावत्स्थास्यति। यावद्गंगा
प्रकटजलायावद्गोवर्द्धनो गिरिः तावन्मार्गोमदीयोयं संततिश्च भ
विष्यति। इत्युक्त्वांतर्हितः। ततस्तस्मात् प्रास्थितं पुनः प्रयागे समा
तु बिल्वमंगलदर्शनं समजनि। बिल्वमंगलेन श्रीवल्लभं प्रत्युक्तं॥

भवाद्भिकाश्यां गंतव्यं। सर्वोपनिषद्गीताव्याससूत्रभागवतभाष्याण्यवलो
कनीयानि। संप्रति कलौ सर्वशास्त्रार्थो मायावादिभिर्विपरीततया प्रतिपा
दितोस्ति। न हि इदानीं ब्रह्मवादिविरोधात् मनसि खेदं जाने बदर्याश्रमं गंतव्यं
तत्र साक्षात् कृष्णद्वैपायनदर्शनं भविष्यति तपोधवस्यापि। तत्प्रसादं वा क्या
नः सर्वज्ञत्वं भविष्यति इत्युक्त्वांतर्हित। ततः श्रीवल्लभेन काश्यां गत्वा तथै
व कृते पश्चात् बदर्याश्रमं गत्वा व्यासदर्शनाकांक्षया स्थितं। एकदा साक्षा
त् व्यासदर्शनमभूत। तदा व्यासेन श्रीवल्लभं प्रति सर्वज्ञो भवेत्युक्तं॥ वयि
साक्षात्कृष्णावेशो भविष्यति। मन्मतानुसारि श्रीभागवतव्याससूत्रादिभाष्यं

कर्त्तव्यं। त्वं मत्यासुरमार्गोत्पन्नै मयायावादः प्रवर्त्तितः तमपाकुरु। इत्यु
क्त्वांतर्हि व्यासः। तदनु हरिद्वारमागत्य कुरुक्षेत्रे श्रीवर्द्धनः समागतः।
तत्र स्थानेश्वरं नाम नगरं। तत्र रामानंदयात्रिकवैष्णवः। तद्गेहे गत्वा तद्दा
तिथ्यं गृहीत्वा उपविष्टः। तेनाध्ययनादिकमपि पृष्टं। तत्र श्रीभागवतश्लो
कैकस्य व्याख्यानं कृत्वा पुनः तस्मात् शुश्रूषामसमजनि। आहवाकिय
का लभमवस्थातव्यं। श्रोष्येहं भगवनमुखात् भागवतं श्रीवर्द्धनेनोक्तं।
यदीश्वरेच्छा। एतस्मिन्नंतरे आगमोक्तविधिना रामानंदो विष्णोः पूजां
कर्तुमारेभे। तत्रैका शालिग्रामशिला चतुर्भुजा भगवन्मूर्त्तिः। शालि

ग्रामशिलायांतस्यांमहती श्रद्धा नगवन्मूर्तैस्ताद्दशीन दृष्टा। अब्रवीद्रामा
नेदः। शालिग्रामशिलास्त्वायं नुवीवज्रकीटविनिर्मिता प्रतिमेयं लक्ष्म
मा। अतः शालिग्रामविशेषः। श्रीमद्भगवत्समाह। प्रतिमो सा त्वाद्दुध्यावर्य
।यथोक्तं स्कंधे। न तथा रमते लक्ष्म्या न तथा रमते हरिः। शालिग्रामशिला
वकेसयथा रमते सदा। अतः शालिग्रामशिलामंदिरमेव। तथा च पाद्मे
श्रव्ये विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिर्विष्णोर्वा वैष्णवानां
कलिमलमथने पादतीर्थे बुद्धि। श्रीविष्णोर्नाम्नि मंत्रे स्विलकलुषहरे शब्दसा
मान्यबुद्धिर्विष्णौ सर्वेश्वरेशे तदितरसममधीर्यस्य वा नारकी सः। श्रीजगन्नाथ ३८

विठ्ठलनाथप्रतिमायांतु सा ख्यावं लोके प्रसिद्धं। एवं श्रीवत्सेनोक्तौ। श्रुत्वा
पिरामानंदेनमेने। एवंमध्याह्नपूजायांविवादः समजनि। रात्रिपूजायाम
पिश्रुत्वापिनमानयामास। श्रीवत्सस्य रोषः समजनि। निशिरामानंद
नसंपुटमध्येभगवत्प्रतिमामुत्तानशायिनीं कृत्वाहृदि शालियामशिला
स्थापिता। ततोव्यतितायांरात्र्यां अरुणोदयेस्नात्वा पूजांकर्तुमुपाविश
गतोसौतावश्यकनित्योजातो। तदारामानंदपूजार्थंसंपुटमुद्घाटयामा
सातदाशालियामशिलाद्वादशधाखंडशोजाता। तद्दृष्ट्वातस्यशंकरमिश्र
नामालघुभ्राताऽतमाह। रामानंदभ्रातस्त्वंब्रजप्रछ कोयंमहानुभावःप

द्वाकाकरणे महानर्थः समजनिततो गत्वा तेन पृष्टं। यथा शालिग्रामशिला
जाता तथा चयमपि न विष्णुस्तिष्ठत्युक्त्वा सोनीर्थांतरं प्रस्थितः। श्रीवत्सेन
वर्षपर्यंतं भूमौ पंचदशशतयोजन एकाप्रदक्षिणा कृता। एवं तीर्थाटनव्या
जेन प्रदक्षिणाद्वयं कृत्वा व्युपरामा असंग्रही। एकः सेवको मे धनलब्धा
सनामा गुरुस्थले पर्वते जले वा यावद्भोजनादि प्रतिदिनमवलोकते ततो व
दीश्वरेच्छया यत्र कुत्रापि भोजनादि प्राप्तिर्भवत्येवान तदधिकसंग्रहापद्वा
चा। श्रीभगवद्गीता भागवतमूलपुस्तकं शालिग्रामशिलैका। यद्दिने रामा
नंदसंग्रहानप्रस्थितं तेनास्मिन्दिने किमपि प्राप्तिर्न जाता। मद्दद सुखं समज ८०
नि

रामानंदगृहे निशि स्वप्ने भगवतोक्तं इमं भागवतं श्रावय तद्दोषवशान्न
लेते। तत एव यात पुनर्यत्र गत्वा सुप्तं तत्र स्वप्ने श्रीकृष्णकृष्णद्वैपायनैर्दृष्टो
। श्रीकृष्णकृष्णद्वैपायनं प्रत्युवाच। श्रीभगवतं प्रादुरासीत् तदर्थज्ञापना
र्थीय मन्मुखमेवाग्निर्वल्लभो यो भवतीर्णः। मदाज्ञया पि मदीयान्प्रति भ
गवतं कथयिष्यति। तदा व्यासेनोक्तं। श्रीवल्लभाचार्य रामानंदोयं त्वदी
न वा। आज्ञाप्ता। भगवदाज्ञया भागवतार्थः प्रकटनीयो वल्लभश्च ततः
श्रीवल्लभो भगवंतं प्रत्याह। रामानंदोयं त्वदीयो न वा। भगवानाह। मदीय
एव। श्रीवल्लभ आह। नायं ममाज्ञाकारी भगवानाह। अयं कस्मिश्चित्सेवा

मेत्रमुनिपुरःसरेतेन्चाप्राणानूवासृजत्॥ अस्यजन्मनासहस्त्वंनाविते
नत्वदुक्तासिद्धांतंनमन्यते॥ बहिर्मुखत्वश्चनाविष्यातित्वयास्यपुनर्गृहंगत्वा
भागवतंवक्तव्यं॥ ततःश्रीवल्लभेनप्रार्थितः॥ श्रीमल्लजन्मशतमवंशेष
तयाकृतवान्॥ ततस्तेप्रबुद्धं॥ पुनस्तद्गृहंगत्वास्वमार्गदीक्षामस्यदत्वाश्री
यद्भागवतंकथितं॥ तद्ज्ञाताशंकरनामासर्वात्मनाश्रीवल्लभंप्रपन्नःयः
प्रभुदासइवकृतः॥ ततःश्रीवल्लभःकाश्यामाजगाम्॥ एतस्मिन्नंतरेश्री
मल्लस्याज्ञाजाता॥ वंशहस्थोनवश्रीवल्लभोनतन्मेने॥ तदामहानुद्वेगो प
धूर्तेस्त्यकेठपाशलक्षणःसमजनि॥ ततस्तेविचारितंपूर्वंतीर्थाटनं ८१
कर्तोममकोप्युपद्रवोनजातःसंप्रत्यत्रस्थानेपिजातः॥ एवंततस्त्यक्त्वा

नुक्तो विचार्य सुतं पुनः सुप्रश्रीहल्लेनोक्तं। विवाहं कुर्विति। श्रीवल्लभो भग
वतेमत्याह। किं रहा श्रमेणाहं तवैव कृतार्थोस्मि। न विषयेषु मन्मनः। भग
वानाह। तवत्र देमवती णपुरास्मि रूपद्वेय न तयोर्नाम्नी गोपीनाथ विठ्ठले
श्वरौ इति भगवद्वाक्यात्स्वप्नान्ते क्रमेणकाश्यांगते। न भगत्वा विवाहमका
षीत्। अग्निपरिग्रहं च कृतः। ततोग्निहोत्रादि विधिना यथादेशं यथा
लं भगवंतेनानायज्ञैरियाज। ततः पुनर्दाश्रीलक्ष्मणस्याज्ञा समजनि। माया
वादितिः सार्द्धं विवादं कृत्वा मायावादं मपयेन। ततसुदिन मूहूर्ते यवलो
कभगवतो मडानीपते हारिपत्रावलबनं कर्तुमारेभे। तद्यथा लिखिते श्री

ब्रह्मस्यप्रसादेनमायावादोनिराकृतः॥अवैदिकोमहादेवस्तत्रसाक्षीन
संशयः।येवैदिकामहात्मानस्तेषांवानुमतिस्तथा।अवैदत्वनुमतेयथा
वोपेक्षितः।पुनस्स्थापितोब्रह्मवादोहिसर्व वेदांतगोचरः।काशी
पतिस्त्रिलोकेशोमहादेवस्तुतुष्यतु।३।कश्चित्तत्रसंदेहःसमांप्रच्छतुसर्व
था।नमयंतेनकर्तव्यंब्राह्मणानामियंगतिः।४।डिंडिमस्तुवादितोद्वारिवि
श्वेशस्यमयात्वहि।विद्वद्भिःश्रवणंकार्यंतथाहिसन्मार्गरक्षकाः।५।तत्र
येविद्वांसोब्राह्मणाःसंन्यासिनश्चशादब्रह्मणोक्ततश्रमःस्कृत्वासमेत्य
श्रीवल्लभंपप्रच्छुः।कोमायावादःकिंलक्षणःयोनवद्भिर्निराक्रियते।

को ब्रह्मवादः यः भवद्भिः स्थाप्यते। तावदिदं वक्तव्यं। श्रीवल्लभेनोक्तं। भव
तोक्तं तु किं ब्रह्म कीदृशोयं प्रपंचः कीदृक् जीवः। ततस्तैरुक्तं। मिथ्याप्रपं
चः। निर्द्धर्मकं ब्रह्म। जीवो व्यापकः तद्ब्रह्मैवेति वेदार्थो भगवता शंकराचा
र्येण दर्शितः। ततश्च श्रीवल्लभ आह। एवमेव मायावादो मया सोढव्य
निराकृत्य ब्रह्मवादस्त्वद्गतो स्थाप्यते। सत्योयं प्रपंचः। सद्धर्मक एव
ब्रह्म। अणुरेव जीवः इति वेदार्थो भगवता कृष्णद्वैपायनेन दर्शितः। ततः
सक्रोधैस्तैरुक्तं। कस्त्वं यच्छंकरमतं दूषयसि। तदा श्रीवल्लभेनोक्तं भगव
तः श्रीपुरुषोत्तमस्याज्ञया असुरप्रकृतीनां मोहायासो वर्णाः। यथोक्तं पा

ती

ये द्वापरादौ युगे नृत्वा कलया मानुषादिषु। स्वागमैः कल्पितैस्त्वंच ज
नान्मद्विमुखान्कुरु॥ अतो ज्ञायते तन्मतं व्यासस्यापि मतं न। अतो
यथा श्रीकृष्णेन गीतायां सर्वोपनिषदार्थ उक्तः। तथैव बादरायणेन अथा
तो ब्रह्मजिज्ञासेति ब्रह्मसूत्रेषूक्तः। तथैव श्रुतिः कल्पतरोः फले श्रीभागवते ए ग
वैकमेवांगीकर्त्तव्यो मवद्भिः। यथोक्तं। बुधावतारे त्वधुना हरौ तद्वंसगाः सु
राः। नानामतानि विप्रेषु कृत्वा कुर्वन्ति मोहनं। अतो यूयं वेदार्थाज्ञानतः।
वेदार्थं विविच्यं तु। न तु श्रुत्वा सक्रोधैस्तैरुक्तं। अहो वयं परंपराचार्यैर्दर्शि
ते वेदार्थं जानीम। त्वं तं दूरीकृत्य पाषंडं स्थापयसि। तच्छ्रुत्वा श्रीवल्लभेनोक्तं

पाषंडलिंगं नवस्त्रेवायनः। शाखास्तु तेशणाँ न दृश्यते। ततस्तैरुक्तं। श्रुतिस्तु तत्र सं
न्यासिनां शिखास्तत्र परित्यागश्रुतयः पठिताः। श्रीवल्लभ आह कस्मिंस्ता
स्त्यमाः संप्रतिनामनेकाः शाखा संति तासु संन्यासिनां धर्माः पठिताः श्रुतितासे
व तत्तु हि पवद्धं उच्छन्नशाखाः श्रुतयो न पठनीयाः। प्रमाणं नावात् इ
त्युक्ते सति किमपि नोक्तं। एवं षण्मासं विवादो यावत् समजनि। तदोप
ड् नामा संन्यासी सर्वश्रेष्ठः। तदग्रे मध्यस्थैरुक्तं अयं कोऽपि महानुभावो विवादे
जेतुमशक्यः। अतोलं विवादेन ततः केऽपि दुरात्मनिर्माणो घमकृतः। तदा २
श्रीमहादेवेनाज्ञा दत्ताः। अत्र न स्थातव्यं। यत्र भागवतीस्तिष्ठति तत्र गंतव्यं।

सर्वोपनिषदुपगीतं श्रीकृष्णाख्यं परं ब्रह्मोपदेष्टव्यं। अन्यया दृशी भगवदीच्छा
तादृशमस्ति ततो दूरे पावनाश्रमे करणाट इति नगरं तत्र वसतिः कृता। तत्रै
कदा गंगास्नानं कुर्वतः। श्रीवल्लभस्य शंकराचार्यः प्रादुर्बभूव। आह च।
त्वया मन्मतं दूषितं। एतस्मिन्नंतरे श्रीकृष्णः प्रादुर्बभूव। आह च। सत्यमे
व वल्लभमतं प्रवर्तयिष्यते न शंकरोक्तं। गोकुलं गच्छेत्युक्त्वांतर्हितः
श्रीवल्लभः साग्निहोत्रो मथुरामंडलमाजगाम। तत्र ष्टु ह्वने गोविंदस्थ
ले भगवन्मंदिरं कृत्वा सेवां कर्तुमारेभे। तत्र काश्मीरदेशीयः केशव
भट्टनामाराधितः शंकरः तत्प्रसादात्प्राप्तवैलुवधर्मः पूर्वं कृत 88

वसतिः स्म तयोः परस्परमैत्र्यन्तरा श्रीवल्लभस्यालौकिको भागवतार्थ
केशवभट्टेन ज्ञातः प्रार्थितंच अत्र भगवतेव्याख्येयं भवान् वक्ता श्रोता
वाहं ततः केशवस्तु दिनमुहूर्त्ताद्यवलोक्यादितः श्रीभागवतव्याख्या
नमारब्धं कालक्रमेण समाप्तं ततः केशवभट्टेनोक्तं मया पूर्वं यादृशार्थो
भागवतस्यार्थो विधारितः सोपि गतः वहुक्तोपि मद्धृदि नागतं न मया
कदाचित् अपि विक्रीतं त्यथी अतः मदुक्तं सदृशं माजानीहि मया वा
मुद्रिष्य नोक्तं वक्ष्यिष्यो यं माधवभट्टनामा अयं मम श्रोता मह्यमेनं देहि तत
तः केशवभट्टेन त्रिभिरन्यै सह श्रीवल्लभनाय समर्पितः ततः स्तस्मात् स सम
समागतः तत् किं श्रीवल्लभेनोक्तं समारानेउपविष्यक्तं तव या अतः ते इदं ना

पणाकारयित्वात्मीयं विधाय श्रीभागवतटीकायां लेखने श्रवणे सावेवमहानू
जातः ॥ ततोन्यकश्चित्कान्यकुब्जीयो नारायणमिश्रनामा श्रीवल्लभस्य शि
ष्यो भवत् ॥ नाहं शास्त्रं ततः पश्चिमात्याः सारस्वतब्राह्मणाः क्षत्रियाश्च ब
हवः सेवकाः अभवन् ॥ एवं कस्य चरितं सद्गुणाश्च वर्ण्यंते नापि कर्तुमश
क्याः ॥ तथैव प्राच्यादाक्षिणात्याश्च ॥ अथैकदा श्रीवल्लभः श्रीगोकुले गृहा
द्बहिः सेवकैर्हृतचतुरसेवकस्नानालंकारचंदनपुष्पमालाभिरलंकृत
सुखेन अल्पदिनावशिष्टः कालेउदङ्मुखः सेवकैः सहोपविष्टः तदोत्त
रतः यमुनातीरे साक्षात् व्रजकुमार प्रादुर्बभूव ॥ हस्तेनाकार्य यमुनामु

त्तीर्यपश्चिमाभिमुखं प्रस्थितः। ततः श्रीवल्लभोपि वस्त्रादिकं तत्रैवोत्ता
र्यकोपीनाछादनावशेषस्तत्र गत्वा तेनैव मार्गेण यमुनामुत्तीर्य भगवंत
मुपवव्राज। मथुरां दक्षिणतो विमुच्य यावद्गोवर्द्धनाचलं तावत्तत्र कूटशि
रस्थ श्रीगोपालराजश्रीगोवर्द्धननाथाधिष्ठाने तत्र गत्वा भगवतास्थि
ते श्रीवल्लभसन्मुखमवलोक्यावादीत्। अत्राहं गोकुलात् श्रीमद्रा
धिकया समानीतः। त्वं द्वारागमनेन क्लिष्टोसि। अथ यस्त्रगुणा यावदंगा
कलौ प्रकटजातावदत्रैवास्मिन्नेव स्वरूपेण स्वमार्गीयेभ्यः सेवां गृहीष्या
मी प्रकटः सन्नत्रैव मम प्राणवल्लभया एकांतविहारस्थलेः सर्वदा

यत्रसातत्राहमपि।यथोक्तं।दशमस्कंधेनंदप्रति।ननपुरोजनपदाः।
नग्रामानगृहास्त्वै।वयंवनौकसस्तातनित्यंशैलनिवासिनः।इतिशैलोस्मी
तितत्रैवकिमधिकम्।इत्युक्त्वांतर्हितभगवतातस्मिन्नेवस्वरूपे(ण)।ततः
प्रभृतितत्प्रसिद्धंस्थानेवल्लभीयानांपूर्वंश्रीविष्णुस्वामीबिल्वमंगलादी
नांगोवर्द्धननाथएवसर्वस्वं।तत्तुवेदेशिगियाख्यापिकायांप्रसिद्धं।या
वतश्रीवल्लभेनभगवंतमनुगतं।तावत्सेवकेनप्रभुदासाख्येनाक्षि(णी)
निमील्यजलपानादित्युक्त्वातत्रैवपतिते।पुनःश्रीवल्लभेसमागतेव
स्त्रालंकारम हृष्टसतिजलपानादिक्रियाकर्त्तुमारब्धा।पुनःकालांत ४६

तत्रैवांतर्हिता ततो भगवन्मुखेन नवनीत दधि मंडलेप सर्वं प्रतह्न तो दृष्ट एवं बहून्याश्च

रमवाप्य श्रीवल्लभनंक तिपय सेवकैः साहं श्रीगोवर्द्धननाथालयं जग्मा यानि दृ
मा तत्र सर्वस्तम हांदधिमंडनव नवनीत पात्रं दृष्टं श्रीवा श्रीराधिका भगव ष्टानि
न्मंदिरमध्ये प्रविष्टौ निपुनर्गोकुलमागते श्रीवल्लभे सेवकैस्तदा ज्ञया
मृन्मयवस्तुरस्वं लं तात त्र रात्रौ बालकैः नक्रीडितं तत्र न ब्रण विक्रा
नि सर्वैर्दृष्टा नि पुनः समयां तरे श्रावणस्यामलपक्षे एकादश्यां महानि
शि नव श्लोकाः श्रीवल्लभं प्रति साक्षात् श्रीभगवता प्रोक्ताः पुनरेकदा क

त श्चित्सेवकः श्रीलल्लूदर्शनाकांक्षी हास्लौत्युत्कंठितुविनबभ्रामा वृंदावनात
दा भगवता श्रीवल्लभं प्रत्युक्तं । वसेवक समीपं गत्वा नीवैः लल्लूतिं वदन्न

हृदेऽप्यसीति।तथैवश्रीवल्लभःकृतवान्।ततस्तस्यश्रीगोकुलपतेःप्राग
ट्यंश्रुतवत्।तिरोधनांतरंश्रीवल्लभमेवप्रपन्नोजातः।कश्चिद्गंगातीरेश्रीव
ल्लभशिष्योभगवत्सेवांकुर्वाणोस्तिस्म।एकदाभगवांस्तमाह।अतस्त्वं
येक्विंचावैकुंठंनेष्यामीति।इतिश्रुत्वातस्यमहद्दुःखमजनि।सेवारस
कवान्।तथापितत्तथैवजातं।पुनरेकदागोकुलात्प्रयागादिस्थलेषी
श्वरेच्छयावसतिंकुर्वाणःसान्निहोत्रश्रीपुरुषोत्तमायतनंप्रस्थितःका
ल क्रमेणश्रीपुरुषोत्तमायतनंप्राप्तः।तत्रैकोमहानभक्तः।श्रीकृष्णचैतन्य
नामातस्यश्रीपुरुषोत्तमस्याज्ञाजातामद्रूपमेववल्लभनामार्चयातः।तंम ५१

दयेमद्धुधार्वय। इति श्रीजगन्नावाक्यात्तथैवासौकृतवान्। एकदा पूर्वं गंगाती
रेवसतः। श्रीवल्लभस्य गृहे श्रीकृष्णचैतन्यैः समागतैतमदृष्टपूर्वं दृष्ट्वा श्रीव
ल्लभेनोक्तं। इमे कृष्णचैतन्याः इत्युक्त्वा नमस्कृताः। तत्समय मध्याह्न भोगानंत
रं भगवति शयनं गते सति श्रीवल्लभाज्ञया पात्र्या पक्वमन्नं पत्न्याद। अनि
वेदितं कथं देयं श्रीवल्लभेनोक्तं देयमावस्य हृदयस्थः श्रीकृष्णोनो ह्यस्त्येव।
एकदा श्रीपुरुषोत्तमे श्रीवल्लभ शिष्यान प्रति श्रीकृष्णचैतन्यैरुक्तं। भवद्भिः श्री
वल्लभे गुरुबुद्धि न कार्या। न पंडितबुद्धि न वैष्णवबुद्धि। अयं तु साक्षाद्देवकीपु
त्र एव। तत्र पुरुषोत्तमायतने बहून्याश्चर्याणि जातानि पुनस्ततो मथुरामंडले

प्रत्याजिगमीष्यां एकदा गंगातीरे वसत श्रीवल्लभस्य ज्येष्ठसुत श्रीगोनाथज
न्मनिजाते भगवत्सेवां कुर्वाणस्य षष्टे रिंगणस्य शिशोः स्पर्शसमजमनिसे
वायांखेतो व्याग्रमभूत्। तदा स्वभायायै क्रुद्धः। वयाकस्माछिम्पुर्नरि ह्यते।
पत्न्याह। शिशुसुप्तोस्ति। तद्वृत्तमपि भगवदीयं भवा तूष्णीमासीत्। श्री
वल्लभस्यथः काश्मीरदेशीयो माधवभट्ट नामा भगवत्सेवार्थं तदाद्वया
स्थितः। अनुदिनं दशमस्कंधपंचरत्नपाठं करोतिस्म। एकदा निशि स्वप्न
केनाघुक्तं। नवपरेद्युः सनत्कुमारदर्शनं भावीति। प्रबुद्धस्ततः परेद्युर्मध्या
न्हे एकाकी भगद्वार्युपविष्टः पंचहायनं बालं ददर्श बालोपि भगवत्तेन

मस्कृत्यस्वीयद्रव्यं विष्टाप्रायं जानीहीत्युक्त्वांतर्हितः। ततो माधवभट्टेन
श्रीवल्लभस्याग्रे कथितं आगत्य ततः। श्रुत्वा श्रीवल्लभेन माधवभट्टो द्वार
कां प्रेषितः॥ एतस्मिन्नंतरे सिद्धववासी रामानंदशिष्यो व्यासः सिद्धपुरे सेवां
कर्तुं मारेजेत नर्बदवोगुर्जुरदेशी पास्तेप्रपन्नास्तेषां मध्ये एको द्विवेदी गोविं
द नामा तत्पिता नारायणदासस्त्वाऊदीच्यो वसन्तद्राख्यस्त्वावसन्तद्राख्य
प स्यसंप्रीपुत्रौ द्वौ द्वारकायां अग्निनामत्युमवापतु। ततोसौ कासीसमीप
रे गंगातीरं गत्वा श्रीवल्लभं प्राप्यात्मसमर्पणं कृत्वा स्वदुःखं निवेदयामास। त
तः श्रीवल्लभेन कियत्कालं प्रत्यक्षं पुनर्द्वारकायां प्रेषितः। व्यासवैल्लवस्य पत्नी

ततोमृत्युमवापाएतस्मिन्नंतरेश्रीवल्लभःक्रमेणदेशानतिक्रम्यद्वारकामा
जगाम।मध्येश्रीकृष्णपदांबुजमत्तिजनजङ्घिन्नपादैस्तत्रतत्रपूज्यमानःवक्र
न्नृत्ततार्थीकर्तुंसिद्धपुरंजगमेषुजनैः।तदाभगवतानिवारितः।द्वारकामेव
व्रजेति।ततोद्वारकांगत्वाश्रीभागवतव्याख्यानमारेभे।तत्रद्वौमुख्यौश्रोतारौ
द्विवेदिनारायणःअच्युताश्रमनामादाक्षिणात्यःकश्चित्संन्यासी।एकदाद्वि
वेदिनारायणंप्रतिश्रीवल्लभेनोक्तं।व्यासनारायणाख्यमत्रानय।ततस्त्वा
का सिद्धपुराद्दूरितोपिनागतः।रामानंदशिष्यत्वात्।तदाश्रीवल्लभेनकिमपिस
क्रोधेनोक्तं।भवतुनामश्रीकृष्णोस्मदीयएवअसावप्यायास्यति।यदैवमुक्तं

तदैव व्यासस्य गृहे महानुपद्रवो जातः । स्थानात्श्रीलक्ष्म्योपि द्वारकां गतः । के
नापि स्वप्ने दृष्टः । ततः श्रीभागवते समाप्य भगवद्गीताख्यानेन कृत्वा द्वात्रिंशदु
पनिषद्व्याख्यानं कृत्वा श्रीनारायणाख्यं अच्युताश्रमं च श्रीवल्लभोत्तमावस्पदं
प्रापितवान् । तयोर्मृत्युसमये भगवद्दर्शनं बहुनामेव जातं । ततः प्रस्था
मा नुमारेण । एतस्मिन्नंतरे मायावादिभिः सार्द्धं विवादः समजनि । तान्निर्जित्य प्र
यागं प्रयाहीति माधवभट्टं प्रत्युक्त्वा वस्म भट्टाख्यं गृहस्थं कारयित्वा द्विवे
दिगो विद्भगवत्सेवायां स्थापयित्वा पुनः श्रीपुरुषोत्तमं प्रतिप्रस्थिताः । ततो ना
रायणाख्यो व्या । व्यासः श्रीवल्लभमेवानु पुरुषोत्तमं जगाम । तत्र भगवत्प्रपन्नो

नवता। ततो गुर्जरदेशात् द्वौ ब्राह्मणौ श्रीवल्लभपदांबुजदर्शनाकांक्षया श्रीपुरु
षोत्तमं जग्मतुः। तत्र गत्वा तं प्राप्य कियत्कालं स्थितौ। तत्रैकदा श्रीजगन्नाथो
दस्त्यारूढो विहारार्थं निर्गतः। तत्र द्रष्टुकामौ गतौ। तत्र भगवत्स्वरूपे श्रीवल्लभरू
पमेव ददृशतुः। पुनः श्रीवल्लभस्थानमागत्य श्रीवल्लभं ददृशतुः। तद्दृष्टांता
दयेकथयतां। एकदा श्रीपुरुषोत्तमयात्रायां काचिद् श्रीवल्लभानुचरी पथि
श्रांता गंतुमशक्ता जाता। श्रीवल्लभेन तत्रापि शीघ्रमये गतं। सेवकैस्तन्नि
वेदितेपि सा रात्रौ। एकाकिनी श्रीपुरुषोत्तममल्पवयसं ब्राह्मणपुत्रमेव ददर्श
आह सोऽहं श्रीवल्लभेन त्वां नेतुं प्रेषितोऽस्मि। शीघ्रं व्रजेति। सा तेन सार्द्धं न 50

गवत्स्थानं प्राप्ता। अथैकदा गोकुले स्वसेवकप्रियाभिः प्रार्थितं स्वभर्तृ
भ्यः। वयं श्रीवल्लभेन सार्द्धं यमुनायां जलक्रीडां कर्तुकामाः स्मः। तैः प्रार्थि
तः श्रीवल्लभः तथैव कृतवान्। तत्र सर्वेपि किशोरा इति श्रीनंदराजकु
माररूपं श्रीवल्लभं ददृशुः। अथैकदा प्रयागे श्रीवल्लभपत्नी तन्माहात्म्यं
द्रष्टुकामासीत्। सापि शयने स्थितेजपुंजमध्ये तत्स्वरूपमेव श्रीवल्लभरू
पं ददृशे। एतस्मिन्नंतरे बदर्याश्रमे वृधवैल्लवनामा कश्चिद्वसति तेन सार्द्धं
श्रीवल्लभस्य महती प्रीतिरभूत्। तस्य भगवत्कृपया भगवत्प्रागट्यम
भूत्। तेन श्रीवल्लभस्यालौकिकमहात्म्यं दृष्ट्वा भगवंतं प्रति पृष्टं। संप्रति

धोरेकलौ श्रीवल्लभमहात्म्यं अलौकिकमेव दृश्यते किंनता। तच्छ्रुवोक्तं भग ..
वता श्रीनारायणेन अयमग्नि व्यासनारदरुद्र श्रीलक्ष्मणांशे प्रादुरभूता। पू
र्वमस्यांशेनैकवारं राजा भोज इत्यभूत। व्याख्याने व्यासत्वेन भक्तिप्रावर्त्त
कत्वं वाचार्यत्वं। अग्नित्वे व्याख्यानकौशलत्वं वागीश्वरत्वात्। श्रीलक्ष्मणत्वे
न समर्थत्वं रुद्रत्वे नागेश्वरत्वात्। नारदत्वेन भक्तिप्रावर्त्तकत्वं श्रीविठ्ठले
श्वरप्रतिष्ठितो भविष्यति। इत्युक्त्वा भगवानंतर्हितः। एकदा प्रयागे लर्कपु
रवसतिं प्राप्य श्रीवल्लभेन मत्स्यलोके जिह्वासुरभवता तदाज्येष्ठपुत्रमुद्दिश्या
क्तं। अथमचिरेण श्रीपुरुषोत्तमनामामेष्यति अयं विठ्ठलेश्वरो वंशधरो भवि ५१
ष्यति

श्रीभागवतार्थोऽस्मिन्नेव मयास्थापितः। एतस्मन्नंतरे माधवभट्टाः
श्रीवल्लभानुग्रहात् भगवंतमवापुः। प्रभुदासस्य महद्लौकिकरीत्या। पू दा
श्रीभगवतस्य टीकास्कंधत्रितयस्य कृता। तानदा श्रीबालकृष्णेनोत्संगउपवेश्य
के। मदीये चरितं व्याकुरु। तदा दशमस्कंधे वाख्यामेव कृतं। द्वितीयस्कंधे
कृमेः स्फुरत रवकृत्य विमर्दिताया इत्यस्य व्याख्याने श्रीवल्लभप्रति श्रीकृष्णेने
म वोक्तं निबंधे गृहे सर्वात्मना त्याज्यमित्यादि श्लोकद्वयं तादृशात् श्रीकृष्णेन
लिखितं। पूर्वं तदा योध्यायां श्रीवल्लभकृत श्रीभागवत व्याख्याने विप्र
रूपेणानुमतावकृतं। एकदा वदर्याश्रमे वाम वाकृष्ण तन्यामकलो। इत्यादि

नरनारायणेन वह्निवन्मुखात् कृतं । एतदनंतरं श्रीवल्लभेनालकपुरस्थे

प न स्वपत्न्यै यदोक्तं । मह्यमाज्ञां देहि । अतोहं प्रव्रजिष्ये साज्ञा न दातुं । तदा

लकपुरं उद्वीक्ष्य स्माज्जातः । तदा पत्नी श्रीवल्लभे अग्निहोत्रशाला

स्थं श्रीवल्लभं प्रत्याह स्वामिन्निर्गम्यतां । यत्र हृदयं निरायाति । एवमुक्तेना

मेवाज्ञां मन्यमानः श्रीवल्लभो निर्गत्य गंगातीरे उपविष्टः । तत्र त्रिदंडवि

धिना यथाविष्णुस्वामीनातन्ध्यायति त्रिदिवानैः कारूपं गतं । तत्रैव विंशति

मेदिवसे स्वरूपमापातु तत्क्रियता कालेनाज्येष्ठपुत्रो गोपीनाथः पुरुषो

त्तमासाद्य स्वरूपमवाप । तत्सुत्र पुरुषोत्तमाख्य श्रीविठ्ठलेश्वरः सर्व ५२

वे

दाजयति तत्सुताः श्रीगिरिधरादयः श्रीवल्लभादनवमाः । पौत्रादयः सर्व
दाजयंति ॥ इति संप्रदायप्रदीपे श्रीवल्लभमंगलपरिकरे श्रीवल्लभचरिते चतुर्थ
प्रकरणं समाप्तं ॥ अथोपनिषदांतत्वं यद्ब्रह्मेति परं विदुः । तदेवदेवकीपु
त्रः सर्वकारव्यापि निर्गुणः ॥१॥ एतावान स वेदार्थस्तदन्योर्थस्य मोहनं । इति
निर्णीयते यथात्र न वा श्रीवल्लभनंदनैः । यतो ब्रह्मपर्यवसिता वेदांताः । अतो ब्र
ह्मप्राप्तिरेव पुरुषार्थः । तद्रूपवैक्ककस्य प्राप्तिः । अतो ये सर्वधर्मान्निषेधा
रूपमेवोपदिशंति तेष्वत्यार्थत्वष्टाश्चतयः कियत्संख्याः । यथोक्तं वृहदा
रण्यके स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा निःश्वसं अनेकुरंते स्य महतो भू

वा त

स्य निश्वसितं यदृग्वेदो यजुर्वेदः सामवेदोथर्वांगिरस इतिहासः पुराणं विद्या
उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि तानि स
र्वाणि निःश्वसितानि। अत्र यदुक्तं तत्सर्वं वेदाद्वेव जातो ज्ञायते श्रुतिस्मृती
तिहासपुराणैः सर्वैः श्रुति पठितं क्रमः श्रोतव्यो निदिध्यासितव्योद्द्रष्टव्य इ
ति दर्शन पर्यंत मेस्यैव कर्तव्यतया न भवति। यथा शैवतीर्थमाहात्म्ये कादश्या
दिव्रतविधानफलानि रूपेणादि ज्योतिःशास्त्रादि कार्यं केवलं ऋग्यजुःसामा
थर्वाख्यैर्न भवति किंतु वेदांगपुराणस्मृतीतिहासैः। समग्र धर्मनिर्वाचक कर्म
कांडेणैव निवृत्तिकांडे ऋग्यादीनिः सेतिहासपुराणैः सर्वैर्वेदर्शनपर्यंतं ब्रह्म

निर्णयः। नान्यथा। यथा एकतरांगीकारे अंधस्य जगत्स्पर्शवता एकदेशी
याः वगतिः ननु समग्रं। यद्यपि रूपा नामा कर्मब्रह्मतर्हि ज्ञातव्य इत्यादयः। किं विष
याः पमस्कृति रूपयथा निरूपयति। तन्न वेदार्थः। संदग्धो न तां अथ वेदार्थनि
र्णये किं प्रमाणं। न कृष्णद्वैपायनो एवं सयद्य नामा सौकथं ज्ञातव्यः। यद्यपि रूपः
मननं निदिध्यासन दर्शनादिक। न कृष्णद्वैपायन प्रमाण। यथा स्कंध पुरा
णोक्त वचनं। देवा ब्रह्मरूपयश्च वेदार्थमृच्छतां गताः। पुरा ब्रह्माणमेवा
र्थं जग्मुः सर्वे विवस्वत। ११ गत्वास्तु वाचन वाच ततः ऊचुः पितामहं।। उ
ईयार्थो विदग्निः कमाधोन्नैव काक्षिता। कथं तत्त्वं भगवन् न वयं जानीम

देंजसा। ततश्च वा भगवान् ब्रह्मा तुष्टाव पुरुषोत्तमं ।३। ब्रह्मोवाच। यो वेदरूपो वे
दार्थो वेदकर्त्ता च वेदवित् । वेदार्थं मूढबुद्धीनां स वेदार्थं ब्रवीतु नः ।४। सत्यं सत्यं पु
नः सत्यं न देवः केशवात्परः। नास्ति वेदात्परं शास्त्रं। एतत्सत्यं स्तुतस्तु पुनः ।५। इति स्तुतो
हृदाकाशे प्रादुरासीत्स्वयं हरिः। श्रुत्वा वाचं भगवान्यः स्वयं पुरुषोत्तमः ।६। सं
भविष्यामि कलया सत्यवत्यां पराशरात् । वेदार्थं चैव वक्ष्यामि सर्वेषां हितकाम्य
या ।७। ब्रह्मसूत्रं करिष्यामि सर्वं कृतार्थसिद्धये। दर्शयिष्यामि वेदार्थं भारतव्य
पदेशतः ।८। वेदशाखासु नष्टासु वेदार्थो भारते कलौ। दृश्यते नात्र संदेहः कथं
केनचित्क्वचित् ।९। भारते भगवद्गीता कृत्यर्थसंशयापहा। श्रुति कल्पतरोः ५१

साक्षात्फलं भागवते ततः ।१०। गीतार्थादि विस्तरेणाहं वक्ष्यामि च विशेषतः
तेन रूपेण वेदार्थं यद्वक्ष्यामि तथैव तत् ।११। तं यो न मन्यते मूढः स पाषंडी नराध
मः । भविष्यंति कलौ स्पष्टा आसुरे ब्राह्मणेष्वपि । ते हि वक्ष्यंति वेदार्थं अन्यथा
हि यथेच्छया । कृष्णद्वैपायनाख्योहं संभविष्यामि सर्वथा ।१२। इत्युक्त्वांतः स
भगवांस्तत्रैवांतरधीयत । ततः पराशरात्कानीनः सत्यवत्यां महायशाः ।१३। य
दर्थमवतीर्णोसौ नन्वथैव च कार्हि । अतः कृष्णद्वैपायनादिदर्शितो वेदार्थः स
र्वोपनिषत्सु याज्ञवल्क्यादिभिर्यदुपदिष्टं ब्रह्म गार्ग्यादिषु तदेव वेदवक्तृः । सह
स एव साकारो व्यापी निर्गुणश्च । यथोक्तं । बृहदारण्यके । प्राणस्य प्राणमुत च

क्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रंममनसोमनोयेविदुरिति।विश्वतश्चक्षुरुतवि
श्वतोमुखोविश्वतोबाहुरुतविश्वतःस्पात्संबाहुभ्यांधमतिसंपतत्रैर्द्यावा
भूमीजनयन्देवएकः।श्रीभगवद्गीतासुच।सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमु
खं।सर्वतःश्रुतिमल्लोके।सर्वमावृत्यतिष्ठतीत्यत्रलौकिकयुक्त्यानिर्णेतुमश
क्यत्वात्।अतोवेदवाक्यार्थएवमंतव्यः।।अतएवसर्ववेदार्थदर्शिताबाद
रायणेनश्रोतव्यादिव्यरूपदृष्टव्यसमयेगीतावत्तत्त्वेनेनतत्स्वरूपमेव
ब्रह्मदर्शितं।महाभारतेसर्वप्राकृतधर्मविलक्षणं।आनंदमात्रकरपादमु
खोदरादिजन्मनामकर्मगुणलीलासहितंसांशांशुद्धंतत्स्वरूपमेवब्रह्मश्रीमा
तं

गवते शुकेनापि गीतं। व्यासेनापि कथितं। अतो ज्ञायते सर्ववेदतात्पर्यकृ
ष्णाख्यं ब्रह्म। एवं पराशरेणापि विष्णुपुराणे। ब्रह्मपाद्मादिष्वपि नरात्मतिपर
ब्रह्मेति। अतः सर्वावताराः कृष्णाख्यस्य। अवतारी श्रीकृष्ण एव। येन्ये वैष्णव
सिद्धांतवादिनो ह्याचार्याः सर्वावताराः तुल्या इति वदंति तेषामवतारांत
रे सर्वात्मना सेव्यबुद्धिः तदंशावतारयोः यदंशः स तेनजेदिति वाक्यात्
स्वोपास्यावतारेंऽशत्व कथनं भक्तिमार्गविरुद्धं। अतस्तेषां तथैव व्याख्या
नमुचितं। स्वेष्टोत्कर्षख्यापकत्वात्। भगवतोपि सर्वकारणसमर्थत्वात् उचि
तमेव। येयथा मां प्रपद्यंते। इति वाक्यात्। परं स्मृतीतिहासपुराणार्थवेदि

नाश्रीबादरायणेनकर्मज्ञानोपासनाकांडात्मकस्यवेदराशेस्तात्पर्यंशु
द्धसाकारब्रह्मणोनंतरूपत्वेपिमूलरूपेदेवकीपुत्रएवेत्युक्तं।यथोक्तंभ
गवता।सर्वस्यचाहंहृदिसंनिविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंच।वेदैश्चस
र्वैरहमेववेद्योवेदांतकृद्वेदविदेवचाहं।१।इतियस्मात्क्षरमतीतोहमक्ष
रादपिचोत्तमः।अतोस्मिवेदेलोकेचप्रथितपुरुषोत्तमः।योमामेव
मसंमूढोजानातिपुरुषोत्तमं।ससर्वविद्भजतिमांसर्वभावेनभारत।
अहमेवेत्येवकारेणयथादृष्टःशुद्धसाकारोहमेवपुरुषोत्तमत्वेनश्री
कृष्णेज्ञातेसर्वविद्भजति।सर्वभावेनश्रीकृष्णमेवभजतिअधिभूतेदारो ५६

प्रकृतिपुरुषज्ञो योपरमात्मा जनवत्सुरा। यद्रूपंसमधिष्टाय तदहमुदीर्यते। इत्यक्षरः पुरुषः।
नावइतिक्षरः पुरुषः तयोरप्युत्तमः पुरुषोत्तमः श्रीलक्ष्मण एव। असावेव प्र
णोवतारा यथोक्तं। तृतीयस्कंधे मैत्रेयेण। पूर्वस्यादौपरार्द्धस्य ब्राह्मो नाम मा
हानभूत्। कल्पे यत्राजनव ब्रह्मा शब्दब्रह्मेति यं विदुः। तस्यैवांते कल्पोऽद्य
पाद्ममभिचक्षते। यद्धरेर्नाभिसरस आसील्लोकसरोरुहं। अयं तु कथि
तकल्पो द्वितीयस्यापि भारत। वाराह इति विख्यातो यत्रासीच्छूकरो हरिः। अत्र
त्र केचिदिति व्याख्यानं कुर्वंति। पूर्वस्य परार्द्धस्यादौ ब्राह्मो नाम महान्क
ल्पो ब्राह्म वर्षमानेन शतवर्षसंख्यः अभूत्। यत्र ब्रह्मा जनवत्। यं वा शब्द ब्रह्मे
ति विदुः। तस्य ब्राह्म कल्पस्यांते पाद्मो नाम महाकल्पोऽभूत्। यत्र हरेर्नाभि

सी के

सारसः पाद्मनात्। तु पुनः अयं वाराह इति विख्यातो महाकल्पो द्वितीयस्यापि
अंते पाद्मकल्पस्यांते अभूत्। अतः पूर्वपरार्द्धवाराहं कल्पस्यैव। अवतार
ग्रहणात्। पूर्वं ब्राह्मपाद्मावभूतां। प्रति पुराणं महाकल्पाः कल्पभेदाध्याय
मस्य पुराणे पठिताः। तत्र सारस्वतकल्पीयं श्रीभागवतवृत्तांतं। यथा मत्स्य
पुराणे। सारस्वतस्य कल्पस्य मध्ये स्युर्ये नरामरा तद्वृत्तांतोद्भवं लोके
श्री भागवतमुच्यते। तत्र भगवान् पुरुषोत्तमः स्वयं पूर्णोवतीर्णः। कृष्णस्तु भग
वान् स्वयं। अत्र भगवान् श्रीमत्पुरुषोत्तमः। जगृहे पौरुषं रूपं भगवान्मह
दादिभिः। अत्र भगवान् पुरुषोत्तमः पौरुषं रूपं जगृहे इति पुरुषावतारं गृ ५७

लः

त
हीवान् अवतारमालाकथनानंतरं तेनोक्तं ।एते चांशकलाः सर्वे कृ
ष्णस्तु भगवान्स्वयं ।अत्र भगवानिति पदं आदौ जगृहे पौरुषं रूपं ।अत्रापि
भगवानिति पदं श्रीकृष्णप्रतिपादकं भगवान्नारायण इति यै
व्याख्यातं ।यस्यांभसि शयानस्येत्यस्मिन्पद्ये नारायणत्वं पौरुषरू
पेणैव ।एतन्नानावताराणां निधानं बीजमव्ययं इति वाक्यात् ।सर्वेव
ताराः नारायणरूपमेव पर्यवसिताः पुरुषो ह नारायणो कामयत इति
श्रुतेः ।अत एव सर्वैरवतारैरंशावेशकलाविभूतिभिः सहितं नारायणो
क्तं पौरुषरूपं भगवति पुरुषोत्तमे कृष्णे सदैवास्ति अत एव पूर्णत्वं श्रीकृष्ण

देवकीपुत्रे। सर्वेषु वतारेषु यावत्यो ज्ञानक्रियावीर्याकृयः प्रत्येकं संति ताः
सर्वाः एकस्मिन्नेव देवकीपुत्रे संति। अतो देवकीपुत्र प्रोक्ता गीतावेदवेदा
र्थनिर्णयसंदेहे प्रमाणं। अतः श्रीभागवते आदिप्रश्नादारभ्य सूतजाना
सि भद्रं ते भगवान् सात्वतांपति। देवक्यां वसुदेवस्य [illegible]
[illegible] जातो यस्य चिकीर्षया प्रतिस्कंधं सर्वावतार
चरितः संक्षेपेण निरूपितं श्रीकृष्णचरितं सविस्तरा निरूपणो भगव
तः। कृष्णद्वैपायनः स्यापि प्रायः सर्वेवतारास्तुल्याइति भवति अतः
श्रीकृष्ण एव पूर्णः। मत्स्यादिभिः पुराणेषु कर्मज्ञानभक्तियोगा सत्य ५८

व्रतादीनप्रयुक्ताः संति वेदार्थनिर्णयसंमतौ सन्यासिनामनुदिनपाठ्य श्री
भगवद्गीतैव अतोऽज्ञायते सर्वोपनिषदुक्तेपरब्रह्मश्रीकृष्ण एव। यथा सारस्व
तकल्पे श्रीकृष्णाख्यं पूर्णब्रह्मादीन् कल्पान् ब्रह्मणो दैवं दिनं वदंति। तस्मिन्
पक्षे ब्रह्मणश्चैकवर्षमध्ये प्रतिदिनं अनुकल्पं। त्रीणिशतानि षष्ट्यधिका
नि श्रीकृष्णावताराभवंति। पूर्णिर्वसारस्वतकल्पीये। महाकल्पवादीनां म
तेपि सारस्वतकल्पस्याव्यभिचारः। अन्यकल्पेषु श्रीकृष्णावतारेषु अंशावं
पुराणेषु नचैवप्रतिपादित्वात्। देवतावं। मंत्राधीनाश्चदेवता इति वाक्या
त्। अतो वैदिकैस्तांत्रिकैर्वेदतंत्रोक्तैर्विधिना श्रीकृष्णावताररूपाणाउ

मंत्राधीनत्वात् २

पास्यंते। तान्यंशावतारस्यैवांगतो दैवैतंत्रोक्तो मार्ग उपासनामार्ग एव
भुक्तिमुक्तिभक्तिसाधकस्त्वा। भक्तियोगं सकलजनतएवं यः पूजयते च मामि
ति भगवद्वाक्यात् पूर्णस्याराधने श्रीमद्वल्लोक्त एव भक्तिमार्गः। तद्यथा चतुर्णां
वेदानामुपनिषदां तत्त्वमस्यादि महावाक्यानि चत्वारि इतिहासपुराणाना
मेकं। एवं पंचमहावाक्यानि। तेषामर्थः सर्वैर्यथा प्रकृति विचारितः। ए
के ब्रह्मजीवयोरैक्यं वदंति। तत्त्वंपदाभ्यां उपदेशमनयोरपि भेद एव ज्ञाय
ते। आत्मत्वेन ब्रह्मणि ज्ञाते सर्वतोधिकप्रेमास्पदमात्मैव। तद्ब्रह्मत्वमसि
तस्तत्त्वमसीति केचित्। आत्मैव आत्मैव श्रीकृष्णः सत्वमसि तदीयोसि वाऽस

नया

तोयः प्रेमास्पदं संभजनीयः। अन्यैरित्याम सांवाध्यार्थं न कुरु मुखा
न्ते शाश्वाति शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नमिति वतात्र पाम सुंदरते दास्य
इति वत् सकृदेव प्रपन्नाय। तवास्मीति च याचते। अभयं सर्वदा दास्य
इति जन्मव्रतं ममेत्यवगंतव्यं सकृत्कार्यादात्मसमर्पणं तत्त्व सेवा
कथाश्रवणजने कार्यं इति भक्तिमार्गः। यथोक्तं भगवद्गीतासु भगव
ताऽर्जुनं प्रति। अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। इति मत्वा भजंते
मां बुधा भावसमन्विताः। भक्तिलक्षणं सा च तेन माहात्म्यज्ञानपू
र्वस्तु सुदृढः सर्वतोधिकः स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्य

था। अहं सर्वस्य प्रभव इति मत्तोधिकस्सर्वेष्ठ नरोप्युक्तः। भ जनप्राका
रमाह। मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं। कथयंतश्च मां नित्यं तुष्यं
ति च रमंति च।१। मच्चित्ता इति पंचज्ञानेंद्रियव्यापारो भगवत्युक्तः। मद्ग
तप्राणा इति कर्मेंद्रियव्यापारो भगवत्येव उक्तः। मद्गतत्वेन निदेषिवं
नलोशत्यागेन प्राणस्य हि क्रियशक्तिरिति वा ख्यात्। बोधयंतः पर
स्परमिति समानशीलैरेव संगोप्युक्तः। कथयंतश्च मां नित्यमिति श्री
भगवतादिस्रवणकीर्तनमप्युक्तं। एवं सेवाकथालक्षणभक्तिसिद्धाः
सैव फलरूपा जातेति। तुष्यंति च रमंति चेत्यनेन निरूपितं। ब्रह्मसा ६०

भ

भादनंतरमीदृशीं भक्तिं भक्तेभ्यो भगवानेव ददाति। न तु साधनैः यथोक्तं
ब्रह्मभूतप्रसन्नात्मा न शोचति न कांक्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभ
ते परां। अतः प्राप्तब्रह्मानंदोपि शुको व्यासात भागवतमधीत। श्रीकृष्णस्या
नंतगुणगणौ कालविशी भागवतकीर्त्तनादौ प्रवृत्तः। अतो ज्ञायते श्रीकृ
व ष्णाख्यमेव सर्ववेदतात्पर्यं परब्रह्मये। यस्मिन कल्पे २ मन्वंतरयुगे २ मत्स्यादि
भगवद्रूपाण्याराध्यते तेषु तेषु भगवद्रूपेषु सायुज्यादिभावं प्राप्ताः। तेषां
तत्तदेव फलं। येषां श्रीकृष्ण एव सर्वशास्त्रतात्पर्यं तेषां सारस्वतकल्पीय
पूर्णकृष्णावतारे व्रजजनानंदानुभावः फलं। अनेकमहाकल्पपर्यंतकृतसा

धनानांसर्वनाशनजनस्यापि यथा श्रीशुकस्य यथा श्रुतिरूपगोपिकानां
यथाग्निकुमाराणां श्रुतिरूपगोपिकानां हृद्यामनपुराणोक्तं कथैति। अग्नि
कुमाराः श्रीरघुनाथवरदानतः गोपिकात्वप्राप्तिः इति कूर्मपुराणे कथा। व्र
जस्त्रीजनसंभूतिः श्रुतिभ्यो ब्रह्मसंगता इत्याथर्वणी श्रुतिः। रहस्यामद
माहादौ ब्रह्मणे पुरुषोत्तमः। स नारदाय प्रोवाच तत्पदं पायनाय सः
स आह शुकदेवाय ततो मार्गस्तिरोनवं पुनः कलियुगे प्राप्ते श्रीगोपी
जनवल्लभः। श्रीविट्ठलस्वामिने प्राह तस्मात्प्रवहवोऽभवन्। आचार्या सर्व
तत्वज्ञाः तत्स्मार्गप्रवर्तकाः। तेभ्यः कालक्रमेणैवमत्र वह्निस्त्वमंगलः

नं

ततास्तिरोहितोमार्गोवर्षसप्तशतंकलौ।ततोग्निरूपीभगवानश्रीवल्लभ
इतिश्रुतः।प्रादुर्बभूवतस्मैसप्राहहल्लेछयान्वित।विच्छेमंगलनामात्र
तिरोभूयस्थितस्वयः।श्रीवल्लभसुतःश्रीमान्श्रीविठ्ठलइतिप्रभुः।तेन
श्रीवल्लभनाम्नाप्तंरहस्यंराधिकापतेः।श्रीविठ्ठलसुताःसर्वेख्यातागिरिधरा
दयः।भगवद्भक्तिंकुर्वंतआयुष्मंतोभवंविदः।श्रीवल्लभप्रोक्तश्रीविष्णु
स्वामिसंप्रदायेसर्वतोधिकंवस्तुपंचकं।भगवतास्थापितं।गुरुसेवाभा
गवतार्थः।भगवत्स्वरूपनिर्णयोभगवत्सेवानैरपेक्ष्यमिति।यदुक्तं
गदाख्येनलिखिवापुस्तकेपुनः।संप्रदायप्रदीपेनतत्सत्यमस्तुहरीच्छया

प्रपंचासत्वं येब्रुवंति कुधियो व्यापकत्वं च जीवेन वेदार्थो येषां भवति च क
लौ वल्लभमार्गानुसारी। न निर्णीतं प्रतं स्वहृदि च परं साक्षात् ब्रह्म शुद्धं न
तेभ्यः शुश्रुषा न च विविदिषा नो विवक्षा ममास्ति। अर्बुदारण्यसंभूतो द्विवे
दीति गदाभिधः। संप्रदायप्रदीपाख्यं ग्रंथं विचकार सः। वासं कृत्वार्बुदारण्ये
धृत्वा चित्ते श्रीकेशवे। ग्रंथं कृतवागदानामा तत्र कृत्योस्तु जायते। अर्बुदा
दग्निदिग्भागे अर्बोरगिरिसंनिधौ। एकलिंगात् शिवदेशानने कृत्यां दिशि
विश्रुतं। सर्वसेवोपकरणं श्यामसुंदरमंदिरं। वसंति तत्र नः सेवां कुर्वंतश्च
कथां मुदा। गदाख्य पुत्रो पौत्रा घारामदत्तादयश्रुता। श्रीवल्लभोक्तमार्गेण
वल्लभसेवापराः सदा। भवंतु सुखिनः सर्वे श्रीवल्लभस्य प्रसादतः॥ ते पुनित्यं ६२

प्रसन्नोस्तु श्रीमद्वल्लभनंदनः । मदन्वयस्वीकारेण सदा नवतु वल्लभनः ।
श्रीमन्नृपविक्रमार्कसमयात् षोडशशताधिकदशमसंवत्सरे श्रीवृंदा
वने श्रीगोविंददेवसान्निध्ये द्विवेदीगदाख्येन ग्रंथोयमकारि इति श्री
संप्रदायप्रदीपे श्रीलक्ष्मणाख्यब्रह्मनिर्णये पंचमं प्रकरणं समाप्तं संव
त १७६१ वर्षे असाढ शुदि २ भृगुवासरे

संस्कृत
पुस्तकालय.
बडोदें.

हीनवानमदवदादिनि:

१५

CENTRAL LIBRARY DEPARTMENT BARODA
SANSKRIT DIVISION.

CENTRAL LIBRARY DEPARTMENT BARODA
SANSKRIT DIVISION.